॥अथदक्षिणामूर्तिसंहिताप्रारंभः॥

श्रीगणेशायनमः॥श्रीपार्वत्युवाच॥त्रिपुरापरमेशानिसर्वमंत्रमयीशिवा॥संविद्रू
पात्मकथितंकथंपूज्यासदाशिव॥१॥ईश्वरउवाच॥प्रातरुत्थायदेवेशिसंस्मरेत्पद्ममुज्वलं॥
कर्पूराभस्मरेत्तत्रश्रीगुरुंनिजरूपिणं॥२॥सप्रसन्नंलसद्भूषामंडितंशांतिभूषितं॥वराभयक
रंशांतंनमस्कृत्वाणुनायजेत्॥३॥हस्त्रींमात्मकलालिरव्यहसक्षमलवानिलात्॥वन्हियुक्तांस्त्रि
धालेख्यत्रिधासंभ्रूणचस्वरैः॥४॥मुखवेष्टनवामांगश्रुतिनेत्रेषुमंडितैः॥बीजत्रयमिदंभद्रे
बिंदुनादकलात्मकं॥५॥श्रीपरांतेपावकेतिसर्वाराध्यपदंलिखेत्॥सर्वस्मैर्ध्यपदांतेचनाथसर्व
गुरुस्वयं॥६॥गुरुश्रीगुरुनाथांतेरहसक्षमलंबुयान्॥रेफदीर्घस्वरयुतान्बिंदुनादकलात्मकान्॥७॥
पिंडीकृत्यलिखेद्दीर्घचतुर्थेचततोलिखेत्॥तृतीयंपूर्ववल्लिख्यद्वितीयमपिपार्वती॥८॥ततःश्रीत्रि
भुवंतेपुनराद्यंसमालिखेत्॥अद्यकूटचतुष्कांतेवाद्यंतार्तीयमालिखेत्॥९॥वसुसंख्येश्वरदेवेशि
चत्वारिंशद्विरक्षरैः॥मंडितोयंमनुर्देविस्मरेन्निजगुरोःप्रिये॥१०॥मूलादिब्रह्मरंध्रांतंविसतंतुनिभां १

यसीं॥उद्यदादित्यरुचिरांस्मरेद्दक्षुभ्रुवांतये॥११॥क्लींमात्मकंकामदेवसर्वांतेजनचालिखेत्॥
प्रियायहृदयांतोयंमनुर्दनविशुद्धये॥१२॥चतुर्लक्षंजपेच्छुभैर्वल्लंक्षारत्रयेसिद्धिहेतवे॥स्नानक
र्मततःकुर्यान्मूलंतंप्रोक्षयेत्तनुं॥१३॥संप्रोक्ष्यगुरुमुत्राद्योमंत्रीयापनिरूंतनः॥आत्मवि
द्यात्रिवेसत्वेराचमेद्विद्ययात्रिधा॥१४॥त्रिविधंतर्पणंकुर्याद्देवर्षिपितृपूर्वकं॥विद्यायथाततोमंत्री
सर्वालंकारभूषणः॥१५॥रक्तवस्त्रांगरागस्त्रक्कासनगृहेस्थितः॥विद्ययानत्वरूपिण्यात्रिराचम्य
भिषेचनं॥१६॥विद्ययैवत्रिधादेविचुलुकेनोदकंसुधीः॥गृहीत्वाचिंतयेत्तत्रवह्नाउयागतंप्रिये॥१७॥
वामकुक्षिस्थितंपापंपुरुषंकज्जलप्रभं॥ब्रह्महत्यात्रिरोयस्यस्वर्णस्तेयकरोप्रिये॥१८॥सुरापानत्व
दंगानिपातकानिबहून्यपि॥उपपातकसंघास्तुरोमाणिपरमेश्वरि॥१९॥नानापातकसंघास्तुसर्वां
गानिविचिंतयेत्॥खड्गचर्मधरंदेविमानसेचिंतयेद्बुधः॥२०॥भ्रूमोवज्रत्रिलांध्यात्वापातयेत्तत्रसं
दरि॥अथार्घ्यंरचयेद्यात्रिधासोरमनुंजपेत्॥२१॥हृच्छेखरात्हृदयंदेविशिरोहंसस्ततोवदेत्॥वे

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

दाक्षरीमहाविद्यासर्वसौराधिदेवता॥२२॥भास्वद्रत्नोघमुकुटस्फुरच्चंद्रकलाधरां॥सद्यःसंतप्तहेमा
भांसूर्यमंडलरूपिणीं॥२३॥पाशांकुशाभयकरांस्मरन्नथजपेत्ततः॥गायत्रीस्त्रीभगायास्त्रन्निधाबीजस्व
रूपिणीं॥२४॥वाक्कूटांतोल्लिखेद्विद्वान्भवेश्वरिविमर्हे॥द्वितीयकूटमुच्चार्यकामिनीश्वरिधीमहि॥तृतीयकू
टमुच्चार्यतन्नःशक्तिःप्रचोदयात्॥२५॥यथान्यक्तिजपंकुर्याच्छ्रीविद्यांचततोजपेत्॥अथयागगृहंयायाद्दक्षे
रुकपिभूषितं॥२६॥अनेकचित्रसभगंभस्मोद्गमयचर्चितं॥उपरिष्टाद्वसलुष्पसुभगंधूपधूपितं॥२७॥
दीपमालावरस्यांविकीर्णकुसुमोज्वलं॥तत्रागत्यजपेद्विद्वान्मोनीज्ञानीसदाशुचिः॥२८॥सर्वाभरणसं
पन्नंस्त्रिपुरार्चनमंडपं॥ॐ तंनमोंतेनपूज्यमंडपस्यस्फुलोचने॥२९॥गणंक्षेत्रपालंचधातारंचविधू
र्वकं॥गंगाचयमुनाचैवतथाद्वारंयनिधिंक्रमात्॥३०॥ततःपद्मनिधिंयष्ट्वाद्वारस्थंतेपुरुषंयजेत्॥
द्वारश्रियंगणेद्रांचपूजयेच्चसरस्वतीं॥३१॥देहलीमपिसंपूज्यपूजयेयंद्वारमंडले॥दक्षेरवांच
श्रियोबीजमादौसंयोजयेत्ततः॥३२॥नामांतेश्रीपदंवाच्यंपादुकांपूजयामिच॥अनेनक्रमयो

२

गेनसंपूज्यास्युःसर्वमातरः॥३३॥रक्तासनोपविष्टस्तरक्तपुष्पानुलेपनः॥रक्तवस्त्रपरीधानतां
बूलापूरितानन॥साधकःपरमेशानिचक्रोद्धारंसमाचरेत्॥शक्त्योपरिष्टात्वाक्किंतुविल्लिखेद्वि
स्तृतांसरेत्॥३४॥वह्निनांतेपुटीकुर्यात्संधिभेदक्रमेणतु॥अग्नीशमरुवायव्यरेखाविस्तीर्य
योजयेत्॥३५॥दक्षाकोणंयथादेविजायतेतद्वदेवहि॥दक्षाकोणांतरेदेविमनुकोणमथोच्यते॥
मध्यकोणचतुष्कस्थरेखाआरुष्यवृद्धिमान्॥३६॥ततत्संधिविभेदेनमन्वस्रंजायतेयथा॥स
मत्रिकोणशक्तेयेवंस्फुरवंनेत्रयोर्यथा॥३७॥सश्रीकंसंधिभेदेनत्रिरेखाविजृंभितं॥ वि
बहिरष्टदलंपद्मंसकेसरंतेनसमालिखेत्॥३८॥तद्वत्षोडशपत्रंहिलिखेत्पद्मंसमुत्तमं॥
सकेसरंपरमेशानितोभूबिंबमालिखेत्॥३९॥चतुर्द्वारंसशोभाढ्यंपुष्पंतत्रविनि
क्षिपेत्॥गंडकीभवपाषाणेस्वर्णेरजततामयोः॥४०॥काश्मीरदर्पणेभूर्जेयार्चापीठंलि
खेद्बुधः॥शालाकस्यासवर्णस्यमिश्रितैर्घुस्रणेदुभिः॥४१॥तथारिंदुरसमिश्रैःपरधा

लुमयेलिखेत्॥अथवाभस्तलेदेविसूरेरंकुंकुमेनवा॥४२॥सिंदूररजसावापिलिखेत्सर्वार्थसिद्धये॥एतत्त्र्यस्रंमहेशानिमध्यबिंदुविराजितं॥४३॥ततस्त्रिकोणंचाष्टारंदशारंचदशारकं॥मनुकोणंमहेशानिमध्यचक्रमिदंप्रिये॥४४॥वेदंवादष्टकोणंतंसर्वमध्यंसुरेश्वरि॥चक्वारिंशद्भगैर्युक्तंत्रिभगैरपिपार्वति॥४५॥वसुपत्रंकलापत्रंचतुरस्रंक्रमात्प्रिये॥नवात्मकंमेदंभद्रेनवयोन्यंकितंभवेत्॥४६॥यथेष्टावरणंसुरवोमंत्रीततत्कर्मविधोसुधीः॥प्राक्सुरवःस्थगासीनोगुरूंनत्वानिजंततः॥४७॥पूर्वोक्तंमनुनासम्यक्गुरुनामचसंस्मरेत्॥पादद्वंद्वात्करास्फोटैरूर्ध्वंचस्कंधमंत्रिकः॥४८॥रवभस्त्रानिसंत्रस्यकरशुध्यादिकंयजेत्॥आद्यंद्वितीयंवर्णेस्यात्त्रिपुरेस्यंतिमंलिखेत्॥४९॥आद्यद्वयंबिंदुनादकलाढ्यंत्रिपुराभवेत्॥तत्रमस्यामहेशानित्रिपुरेशिवनान्यथा॥५०॥मध्यमादितलांतंतुकरशुद्धिविधोयजेत्॥ततआत्मासनंदद्यात्सुंदर्यापरमेश्वरी॥५१॥वाग्भवंत्रिपुरेश्वर्याहित्वातत्रविनिक्षिपेत्॥तद्वद्रवांसुंदरी

नामत्रिपुरेशिवपूजनं॥त्रिपुरेत्र्यात्रिबीजेषुहकारंयोजयेत्प्रिये॥५४॥पुरवासिन्यसौभद्रेत्रिपुरेशिवपूजनं॥त्रिपुरेशीहसाद्यास्त्रबीजयुग्मेतथांतिमे॥५५॥शिवाद्याश्रीरिपसर्वमंत्रासनविधोयजेत्॥सुंदर्याअतिमहत्त्वाबलेमात्मकमक्षरं॥५६॥संयोज्यमालिनीदेवीसाध्यसिद्धासनेस्थिता॥तंत्रमस्यामहेशानित्रिपुरेशिवसंभवेत्॥५७॥आत्मरक्षांप्रकुर्वीतत्रिपुरेशामहेश्वरि॥संपत्प्रदाभैरवीयंमंतेसवर्यसमन्विता॥५८॥मूर्त्यावाहनविद्यास्त्रसिद्धांबापरमेश्वरि॥संपत्प्रदाभैरवीवत्पूजनंपरमेश्वरि॥५९॥ ॥इतिश्रीदक्षिणामूर्तिसंहितायांकरशुध्यादिचतुर्विंशतिः पटलः॥२४॥ ॥ईश्वरउवाच॥शिवचंद्रोमनमथोरःशक्तिर्वैविंदुमालिनी॥क्षमाबिंदूर्धमात्राश्यनववर्णाभवंतिहि॥१॥शिवाद्यात्रिमयीदेवीव्योमाकारेणसंस्थिता॥विश्वरचात्मनिचिद्रूपेवहंतीसलिलालया॥२॥चंद्रेणप्लाषयंतीयमस्त्रादित्रह्ममंदिरात्॥आछावयंतीसकलाविश्वयोनिरितीरिता॥३॥अंतःकरणवृत्त्यातुविश्वांतर्मातृकाभवेत्॥अंतर्मायेतिविख्याताययेदधार्यतेजगत्॥४॥अतएवक्षमारूपाजग

द्वान्तीपराभवेत्॥एवंवैंदवमासीनानादरूपामहेश्वरी॥५॥नाहातीताविचारेतुविचारागोचरा
ततः॥एवंब्रह्मभयेवर्णेर्जायतेत्रिपुरामनुः॥६॥नान्येवर्णेर्महामंत्राः सुभगायाभवंतिहि॥शुद्ध
श्चयश्चबलामंत्रास्तथाचोभयसंज्ञकाः॥७॥शुद्धविद्याःस्मृताःप्रोढेसबन्धायेनमरुताः॥कामा
कान्तोऽन्तिकूटस्तुर्यश्चमायावाग्भवंयजेत्॥८॥अनेनत्वविलिख्यंतेविद्यासर्वागमीश्वरी॥मदनानुजहृ
कामोमदनाग्रजउच्यते॥९॥हित्वानुजंत्रिवंसाग्रेविद्येयंमनुरूपिता॥कामःसहाग्रजोवापित्रिवंका
मानुजंविना॥९०॥सहार्द्धमदनेनाक्तोऽसाद्यकानुजंविना॥चंद्राराधितविद्येयंभुक्तिमुक्तिफलप्र
दा॥९१॥अनुजेनविनाकामोहसादिर्वाग्भवंस्मरेत्॥हसादिर्मदनेनाक्तोसहादिःकानुजंविना॥९२॥
कुलेराधिष्टितविद्याभुक्तिमुक्तिफलप्रदा॥हित्वाहंवाग्भवंकामंहसादिकामहामनुः॥९३॥लुप्तैक
दन्तामेहित्वान्तिकूटेथलिख्यते॥कामानुजत्रयंहित्वासहसाद्योगजस्तदा॥९४॥लोपामुद्रेपासि
तेयंभुक्तिमुक्तिफलप्रदा॥इयंविद्यान्तिकूटेमहानाहार्थसिद्धिदा॥९५॥कामराजाराधितेयंभुक्ति

मुक्तिफलप्रदा॥एतस्याएवविद्यायाःशक्तिबिंदूनतादूयं॥९६॥हित्वाहसादिर्गदितागस्याराधि
तदेवता॥धर्मार्थकाममोक्षाणांमालेयंसंप्रदायतः॥९७॥हित्याद्यपुटलंचापिसाद्यकामेन्दिवादि
कं॥शक्तिबिंदुस्त्रयंत्यक्त्वाकामंतत्रविनिक्षिपेत्॥९८॥शक्त्यावगस्त्यविद्यावन्नंघाराधितदेवता॥
कानुजानांत्रयंत्यक्त्वाहसाद्यवाग्भिमन्मथे॥९९॥हसाद्यमंतेहसयोर्मध्येकः सूर्यपूजिता॥अग
स्त्यकूटत्रितयंसूर्यकामंसमालिखेत्॥२०॥पुनस्तत्कूटमध्येत्रांतार्तीयंचाथसलिखेत्॥सहा
द्यंविष्णुपूजेयंषट्कूटापरमेश्वरि॥२१॥अगस्त्याद्यंवाग्भवंस्यादेतदेवसकादिकं॥विष्णुविद्यापं
चमंचरकंदाराधितदेवता॥२२॥अगस्त्यस्यविधाविद्यांविलिख्यमनुवित्तमः॥चतुर्थीपंचमीमायांत्य
जेष्टिचवलदिस्थितः॥२३॥वाग्भवस्त्रिचतुर्थंचकामराजस्तृपंचमं॥शक्तिकूटत्रिवर्णंचकामराजस्य
संलिखेत्॥२४॥मायास्त्रनेहरीवर्णयुगलंचक्रमालिखेत्॥दूर्वाससापूजितेयंपुरुषार्थप्रदायिनी॥२५॥
एतेद्वादशमंत्रास्युःशुद्धाःसर्वार्थसिद्धिदाः॥अन्येपिशुद्धभेदास्तुकथंतेदृपयांतव॥२६॥भेदस्तम

उविद्यायांनास्तिसर्वागमेष्वपि॥त्रिवर्चंद्रकराक्रीत्वत्स्वेरवावाग्भवंवदेत्॥२७॥जीवे
त्रामदनेकारबिंदुस्त्रक्स्थिवीपरा॥एतत्कामेन्चतार्तीयंद्वितीयाचंद्रपूजिता॥२८॥कु
बेरत्रात्रिकूटंचकामकूटंसमालिखेत्॥वाग्भवेकामराजेचत्रात्रिबीजमथोलिखेत्॥
२९॥त्रिवकामेत्रात्राक्रीचपराधनदपूजिता॥अपरेयंमहाविद्यालोपमुद्रेतिकथ्यते॥३०॥
अगस्त्यस्यमहाविद्याकामराजसएवहि॥अगस्त्याराधितावियासेवागस्त्यत्रपूजिता॥३१॥
विष्णूतिमंवाग्विकामेसादिकामस्यमन्मथं॥सहयुग्मादिकामांतंत्राक्रोर्नदीत्रापूजिता॥
॥३२॥भवस्कस्यविद्यायानास्त्येवपरमेश्वरि॥विष्णूविद्यांतरंवक्ष्येकूटत्रयविराजितं॥३३॥
जीवेत्रारुमापरावाग्विकामेविष्णोश्चपंचमं॥त्राक्रोकामांतिमंविद्याद्वितीयाविष्णूपूजिता॥
हसत्रात्रिकाभ्रमायाकूटमेतत्त्रिधालिखेत्॥वाग्विकामेतथात्राक्रोस्कंदपूज्यापराभवेत्॥३

गस्त्यस्यमनोज्ञेयंपरावाग्विहसांगता॥कामेत्रयोतेभ्रजीवोत्रिकूटात्रिवपूजिता॥३६॥ए
तेभेदावरारोहेशुद्धाःसिद्धीप्रदायकाः॥शुद्धभेदद्वयंवक्ष्येभोगमोक्षफलप्रदं॥३७॥जीवेत्रा
कामभ्रमायावाग्विकामेपिसंलिखेत्॥इदमेवपुनःत्राक्रोविद्येयंत्राक्रपूजिता॥३८॥कत्रात्रि
बिंदुमालाख्याःत्रात्रिकूटंषडक्षरं॥वाग्विकामेहकाकात्रेक्ष्माकात्रयग्निसमन्वितं॥३९॥त्रा
क्रोत्रींकरलाकात्रेवन्हिमत्परमेश्वरि॥उन्मनीनामविद्येयंकेवलंमोक्षदायिनि॥४०॥एतेशुद्धाः
सदाजस्त्वाःसिद्धिदात्रत्रसंशयः॥अथवक्ष्येमहात्रानिमंत्रान्त्रावलसंज्ञकान्॥४१॥काम
राजस्यबिंदुंदुत्याज्याकामाक्षरंक्षिपेत्॥तत्रैवत्राक्रसंपूज्याविद्येयंभुक्तिमुक्तिदा॥४२॥काम
राजस्यविद्यायामध्येजीवंविनोच्चरेत्॥अंत्यंजीवत्रिवस्कस्कविद्यावरुणपूजिता॥४३॥एत
स्याएवविद्यायाहित्वाबिंदुस्त्रजंक्षिपेत्॥तत्रैवकामविद्येयंधर्मराजसपूजिता॥४४॥कसकक्ष्मा

स्त्रीक्लेरवेहसक्लेस्मरहृक्षमा॥ हृद्भुरवामनमथेन्द्राक्लौंसकलाग्निमयीपरा॥४५॥वन्हिनापूजिता
विद्यामहाविघ्नौघघातकी॥अगस्तिकूटयुगलंवन्हिप्रज्ञांतिमंलिखेत्॥४६॥विद्यापन्नगराजेनपू
जिताभुक्तिमुक्तिदा॥कऋक्तिवन्हियुगलंभ्रवन्हिभुवनेश्वरी॥४७॥हकलाग्निहलामायासरकृक्षा
ग्निमंडिता॥मायावासुप्रपूज्येयंमहापापौघभंजिनी॥४८॥केऋक्तिर्वैदवीवन्हिक्षमामायाहकहलक्रमा॥
मायासहकऋक्ताग्निमायेयंसोमपूजिता॥४९॥कामाकाऋक्षमामायान्त्रिचकामहभ्रस्वरा॥माया
कामेऋक्तिकूटेसकलभुवनेश्वरी॥५०॥ईशानाधिष्ठितावियासर्वकामप्रपूरिणी॥कामराज
स्यपूर्वमातेजीवक्षमामादनापरा॥५१॥इत्याराधितविद्येयंसर्वकामार्थसाधकी॥कामाधिष्ठित
विद्यांतेविलोमांतांसमालिखेत्॥५२॥नारायणाधिष्ठितेयंषट्कूटापरमेश्वरि॥कामाद्यंवाग्भवंस
मेहकहक्षमापराभवेत्॥५३॥ऋक्त्याचगस्त्यवाक्कूटंविद्येयंब्रह्मपूजिता॥अगस्त्यवाग्भवंवाचित्र
ह्मविद्यानिमद्वयं॥५४॥जीवाचिंतामहाविद्यासर्वकामप्रपूरिणी॥एतेहृदित्रिभिर्भेदैःशबला

परमेश्वरि॥५५॥शुद्धशुद्धमहाभेदाज्ञातव्याःपरमेश्वरी॥विद्याःसंलिख्यशुद्धास्तुविपरीतास्त
नोलिखेत्॥५६॥ताएवहितदाशुद्धशुद्धविद्याभवंतिहि॥यावंतःशुद्धभेदास्यस्तावंतस्तेत्रकामात्रि
ये॥५७॥तथेवशबलाहृद्भेदादेविभवंतिहि॥भेदासर्वेत्ययापीडामाययालुप्तसंज्ञिकाः॥५८॥
तेज्ञानगहनाब्रह्मरूपास्तुपरमेश्वरि॥ज्ञातव्यागुरुवक्त्रेणत्वन्मथाङ्गमवाप्नुयात्॥५९॥अथ
वक्ष्यमहेशानिचतुर्द्धाज्ञानमुत्तमं॥एकधाकथितंचैतत्प्रकारांतरमुच्यते॥६०॥यस्यस्मरणमात्रे
णवाजपेयंत्रालंलभेत्॥वक्ष्यमाणंबीजयुग्ममादौसंयोज्यसंस्मरेत्॥६१॥परान्नारेचरेहृदिहि
तीयोभेदउच्यते॥एतद्वैदादिसंसेव्यंतृतीयोभेदउच्यते॥६२॥स्वयंब्रह्मामहेशानिसप्तदुच्चारणा
द्बुधः॥अथतुर्यप्रकारस्तुकथ्यतेभुविदुर्लभः॥यस्यस्मरणमात्रेणपलायंतेमहापदः॥स्व
यंब्रह्मास्वयंविष्णुःस्वयंरुद्रोनसंशयः॥किंपुनर्देवदेवेशिस्वयंकामेश्वरोविभुः॥६३॥अश्वमेध
सहस्राणिवाजपेयस्यकोटयः॥नरमेधसहस्राणिसप्तदुच्चारणात्प्रिये॥६४॥कान्यादितो

र्थयात्रास्फलप्राप्तिरक्षिण्वंभुवस्तथा॥गंगास्नानसहस्राणिनानोच्चारणमंत्रिणः॥किंपुनर्देविसाक्षात्तु
मंत्रीब्रह्मनसंशयः॥द्वितीयस्यादिमुग्मंतुविपरीतंलिखेत्सुधीः॥कुबाह्यांतर्मुखंवृत्वाविलिखे
च्यंतनःपरं॥तारंमायंततस्तोलक्ष्मीकूटत्रयंक्रमेणतु॥एतत्संपुटितंकुर्याच्चतुर्थीयांपरमेश्वरि॥६७॥
श्रीविद्येयंसमाख्यातावर्णितुनैवशक्यते॥जिह्वाकोटिशतैर्देविकोटिवक्त्रशतैरपि॥पंचास्येनमु
हादेविवर्णितुंनशक्यतेकथं॥श्रीविद्यासर्वविद्यानांराज्ञीस्तोतुनशक्यते॥षोडशाक्षरसंपन्नाखयं
सप्तदशीकला॥श्रीगुरोःकृपयालभ्याऋद्धिसिद्धिप्रदायिनी॥अंतेनिरालयंब्रह्ममंत्रीभवतिनान्यथा॥
ब्रह्महत्यासुरापानस्वर्णस्तेयादिपातकं॥उपपातकलक्षाणिहंतिश्रीस्मरणक्षणात्॥सर्वकला
र्णमंत्रास्फभवंतिपरमेश्वरि॥एकोनविंशदर्णंतुनारायणीहरिहृये॥शिवविद्यामहेशानिविद्धिसप्त
दशाक्षरीं॥७५॥इंदुविद्यास्फसकलाएकोनविंशदक्षराः॥नारायणीवैष्णवीचपंचविंशतिवर्णकाः॥७६॥
एकविंशतिवर्णात्माशिवविद्यामहेश्वरि॥ज्ञातव्यागुरुवक्त्रेणनान्यथाशपमाप्नुयात्॥७७॥चतुः

वष्टियंतःकोलोयोगिन्योमातृमंडलात्॥विनागुरूपदेशेनसाधकंनाशयंतिहि॥७८॥ ॥इतिश्रीदक्षि
णामूर्तिसंहितायांश्रीविद्याविवरणंनामपंचविंशतिःपटलः॥२५॥ ॥ईश्वरउवाच॥श्रीविद्यामान
सोभ्यर्चावामभागेमहेश्वरि॥चतुरस्रंजलेनैवमंडलंपूजयेत्प्रिये॥१॥गंधपुष्पाक्षतैस्तत्रयंत्रिकां
पूजयेत्तथा॥शंखंतत्रन्यसस्थाप्यजलपूर्णंसहेतुकं॥२॥सम्यगभ्यर्चतेनैवपुरतोमंडलंयजेत्॥
चतुरस्रंलिखेत्तत्रयंत्रिकांस्थापयेत्सुधीः॥३॥त्रिकोणवृत्तषट्कोणंमंडलंपूजयेत्क्रमात्॥सम
स्तांगस्वरूपांचत्रिकोणेपूजयेत्सुधीः॥४॥द्विरात्रत्याषडंगरूषट्कोणेषुप्रपूजयेत्॥आधबी
जेनवह्निंतुयत्नकारेणपूजयेत्॥५॥हेमादिनिर्मितंपात्रंसर्वैश्वर्यप्रदायकं॥नारिकेलस्वं
प्रिये॥महावांरंचविद्वोषेणभुक्तिमुक्तिफलप्रदं॥६॥नारिकेलोस्वंपात्रंसर्वैश्वर्यप्रदायकं॥भु
क्तिदंचविद्वोषेणसर्वकर्मकरंसदा॥७॥गंधाद्यैश्चर्चितंधूपधूपितंपात्रमुत्तमं॥यंत्रिकायांप्रति
ष्ठाप्यपूर्वोक्तंयंत्रमालिखेत्॥८॥तथैवपूजयेत्कामकूटमुच्चार्यसंदरि॥सूर्यपात्रमयंतत्र

विन्नोषेणचपूजयेत्॥९॥भागत्रयंविन्नोषस्यभागमात्रंजलेक्षिपेत्॥तत्रापिसंलिखेत्पूर्वयंत्र
पूजांचकारयेत्॥१०॥त्रिकोणेपूजयेद्विद्यांमध्यकोणत्रयेततः॥कूटत्रयंक्रमेणैवयथाविद्या
तथाविधं॥११॥श्रीविद्याविषयेदेविसंपूटत्वेनपूजयेत्॥सर्वत्रायंक्रमोदेव्याःमात्रालस्पंचरे
त्प्रिये॥१२॥देवीमूलषडंगानिक्रमेणपरिपूजयेत्॥शक्तिकूटंसमुच्चार्यतज्जलंचंद्ररूपक॥१३॥
संपूज्यमध्येन्यस्तेनुमात्रकात्मकमाचरेत्॥अकथादित्रिरेखात्मसहस्राभ्यंतरंबुधः॥१४॥
पंचकोशामहाविद्याःसंस्मरेत्तत्रसुंदरी॥तार्तीयंश्रीगुरोर्बीजंहंसविद्यामनुंजपेत्॥१५॥
वारत्रयंततोदेविश्रीविद्यासप्तधाजपेत्॥स्पृष्ट्वार्घ्यकंततोगंधपुष्पाद्यैरर्चयेत्ततः॥१६॥चि
दानंदमयंधामनेत्रद्वयगतंस्मरेत्॥प्रोक्षयेत्तेनकेसलंपूजाद्रव्यांतरंततः॥१७॥आत्मान
मपिसर्वतद्विद्यारूपंभवेत्प्रिये॥अंगुष्ठानामिकाभ्यांतुवाममार्गेणसुंदरि॥१८॥तत्वमुद्रे
यमाख्याताम्हापापनिकृंतनी॥अंगुष्टतर्जनीभ्यंतुज्ञानमुद्रेयमीरिता॥१९॥अनयापुष्पपूजा

स्यात्तयातर्पणंपूजने॥भूतशुद्धिविधिंकुर्यान्मंत्रीदेहस्यशुद्धये॥२०॥वायुबीजेनदेहस्यधातवःपा
पसंयुताः॥संशोष्यवन्हिबीजेनपापेनसहितंदहेत्॥२१॥पापंविनापुनर्देहममृतीकृत्यजीवयेत्॥
जलबीजेनदेवेशिपार्थिवेनस्थिरीकुरु॥२२॥ततोदेहस्यसन्नाहंसम्यक्कुर्यात्समाचरेत्॥कवचशुद्धि
पुरादृत्वाचलुरासनदेवताः॥२३॥पादयोर्जघयोर्जान्वोर्गुह्याधारेचविन्यसेत्॥कनिष्ठाणष्टरहिते
स्त्रिभिस्तत्तदिविन्यसेत्॥२४॥मध्यमानामिकाभ्यांतुन्यसेच्छिरसिमंत्रवित्॥अंगुष्टेनशिरस्यन्य
स्यदृग्भिःकवचंन्यसेत्॥२५॥तदृतेनेत्रविन्यासंविन्यसेत्परमेश्वरि॥तर्जनीमध्यमाभ्यांतुत
तोरूपंविन्यसेत्प्रिये॥२६॥आत्मरक्षाकरींविद्यांहृदुच्चार्यन्यसेद्बुधः॥व्यापकत्वंमूर्ध्वन्यंवि
न्यसेत्सिद्धिहेतवे॥२७॥अथवक्ष्येमहादेविश्रीविद्यान्यासमुत्तमं॥संपूर्णाचिंतयेद्विद्यांब्रह्मरंध्रे
रुणप्रभां॥२८॥स्त्रवत्सुधाप्लावितांगांमहासौभाग्यदांस्मरेत्॥वामांसदेशेसौभाग्यदंडिनींध्यायये
ततः॥२९॥रिपुजिह्वाग्रहंसुद्रांपादमूलेविनिक्षिपेत्॥त्रैलोक्यस्यत्वहंकर्त्तीध्यात्वैवंतिलकंन्यसेत्॥३०

संपूर्णामेववदनेवेष्टनत्वेनविन्यसेत्॥पुनःसंपूर्णांवदनेगलोर्द्धेविन्यसेत्तथा॥३१॥पुनःसंपूर्णया
देहंवेष्टनत्वेनविन्यसेत्॥३०॥व्यापकांतेयोनिमुद्रांमुखेक्षिप्त्वाभिवंद्यच॥३२॥त्रैलोक्यक्षोभयत्याख्यु
ससन्नद्धविग्रहः॥मुष्टिंबध्वोर्ध्वगलन्मंत्रीतर्जनीदंडवत्तदा॥३३॥सोभाग्यदायिनीनामरिपून्दंडयतेक्ष
णात्॥अंगुष्ठमुष्टिंकुर्याद्रिपुजिह्वाग्रहाभवेत्॥३४॥संयोज्यहृल्लादेवेशितर्जन्यानाभिकांयजेत्॥न
द्वयामेचसंस्रज्यन्योन्याकारेणयोजयेत्॥३५॥उपर्यंगुष्ठयोगेनयोनिमुद्रेयमीरिता॥अनयामुद्रिया
देवित्रैलोक्यंवशमानयेत्॥३६॥परिभ्राम्यानामिकांतुमूर्ध्वानंपरितःप्रिये॥ब्रह्मरंध्रेक्षिपेद्विम
णिबंधंन्यसेत्ततः॥३७॥ललाटेनामिकांकुर्यात्षोडशार्णांस्मरन्प्रिये॥त्रैलोक्यमरणंध्यायन्यासःसं
मोहनाभिधः॥३८॥पादयोर्जंघयोर्जान्वोकट्योरंधनिषष्ठके॥नाभेःपार्श्वद्वयेचैवस्तनयोरंसयोस्त
था॥३९॥कर्णयोर्ब्रह्मरंध्रेचवदनेधनिपार्वति॥ततःकूर्यप्रदेशेतुकरंवेष्टयोःक्रमात्॥४०॥संहारोयं
महान्यासोबीजैःषोडशभिर्न्यसेत्॥गोलकंचततःकुर्यात्त्रैलोक्यक्षोभकारकं॥४१॥मात्काविन्य

सेत्पश्चाद्गणेशग्रहरूपिणीं॥नक्षत्रयोगिनीराशिपीठवर्णस्वरूपिणीं॥४२॥सकलाम्नायविद्याभि
रंकितांविश्वमातरं॥शिरोललाटभ्रूमध्यकंठहृन्नाभिगोचरे॥४३॥आधारमूलकंयावद्गुह्यमायोनि
नीन्यसेत्॥सृष्टिन्यासततःकुर्यात्सर्वसिद्धिप्रदायकं॥४४॥ब्रह्मरंध्रेललिकेनेत्रश्रुतिघ्राणोष्ठकेषुच॥
दंतयोरोष्ठयोर्द्वेजिह्वायांचोरुकूपके॥४५॥एषसर्वांगहृदयसंतुक्षिषुलिंगके॥श्रीविद्यार्णेन्य
सेद्विमंत्रीसर्वसमृद्धये॥४६॥स्थितिंन्यासततःकुर्याच्छ्रीविद्याषोडशाक्षरैः॥पंचांगुलीषुकर
योःब्रह्मरंध्रेमुखेहृदि॥४७॥त्रयंविन्यस्यनाभ्यादिपादांतंचैवमर्च्चजेत्॥गलादिनाभियंतमपू
रंचतथाप्रिये॥४८॥ब्रह्मरंध्रादिकंठांतमेकंविन्यस्यपादयोः॥अंगुलीषुचविन्यस्यन्यासोयंस्थि
तिकारकः॥४९॥काननाक्षिश्रुतिघ्राणगंडोष्ठेषुमुखांतरे॥नेत्रयोर्वदनेवर्णान्यसेत्सोभाग्यहेत
वे॥५०॥कसीमंतललाटेषुभ्रुवोर्गंडघ्राणवर्त्मयोः॥करसंधीषुसाग्रेषुषोडशार्णान्क्रमान्यसेत्॥५१॥
शिरोललाटभ्रूवर्त्मजिह्वाग्रपर्वसंधिकोष्ठिषु॥षोडशार्णान्यसेद्भक्त्यास्वरस्थानेषुचक्रमात्॥५२॥

ललाटगलहृन्नाभिमूलाधारेषुपंचकं॥ ब्रह्मरंध्रेमुखवृत्तांतेबीजत्रयमथान्यसेत्॥व्यापक
गोलकंकुर्यान्महासौभाग्यहेतवे॥५३॥श्रीविद्योद्धृदयेदेविसंपूर्णांविन्यसेत्सुधीः॥पुष्पेर्वाना
मयावापिमनसावान्यसेद्गुं॥५४॥एवंविन्यस्तदेहःसन्मुद्राःसंधारयेत्क्रमात्॥पूर्वोक्तयोनि
मुद्रायाःपृथग्रचंउच्यतेकुरु॥५५॥अंगुष्ठाभ्यांकनिष्ठाभ्यांमध्यमाभ्यांकरेणतु॥त्रिखंडानाममुद्रे
यंत्रिपुराह्वानकर्मणि॥५६॥अनामाभ्यांकनिष्ठाभ्यांमध्यमेरोधयेत्ततः॥अंगुष्ठावनुजालग्नौ
दंडवत्तर्जनीद्वयं॥५७॥क्षोभणीयंमहामुद्राद्राविणीतुनिगद्यते॥एतस्याएवमुद्रायामध्यमेतर्जनी
युते॥५८॥सर्वविद्राविणीनामद्वितीयापरिकीर्तिता॥एतस्याएवमुद्रायातर्जनीमध्यमायुगं॥५९॥
अंकुशाकाररूपेणयोजयेत्परमेश्वरि॥त्रैलोक्याकर्षिणीमुद्रातृतीयापरिकीर्तिता॥६०॥पुटाक
रोकरौकृत्वातर्जन्यौचांकुशाकृति॥परिवृष्यक्रमेणाथमध्यमेतदधोगते॥६१॥क्रमेणतेन
मनुवित्कनिष्ठानामिकाद्वयं॥संयोज्यघर्षयेत्सर्वाअंगुष्ठौचाग्रदेशगौ॥६२॥सर्वावेशकरीमुद्रा

चतुर्थीपरमेश्वरी॥संमुखंवातुकरौयोज्यौमध्यमाग्रभागनुजे॥६३॥तर्जनीभ्यांबहिर्युक्तेअनामेसरले
कुरु॥मध्यमानखदेशेषुततेअंगुष्ठौचदंडवत्॥६४॥उन्मादिनीनाममुद्रापंचमीपरिकीर्तिता॥क्रमेणपं
चबाणास्तुमनवःपरिकीर्तिता॥६५॥एतस्याएवमुद्रायातर्जन्यौमध्यमानुजे॥कुर्यान्महांकुशाका
रोमुद्रेयंतुमहांकुशा॥६६॥अंकुशाख्यमहाबीजंमनुरस्याःप्रकीर्तिताः॥वामदक्षिणबाहूनुदक्षिणंसव्य
हस्तगं॥६७॥बाहुंकुर्यात्ततोदेवीहस्तौसंघर्षयेत्क्रमात्॥कनिष्ठानामिकाद्वंद्वंमध्यमाष्टकगंततः॥६८॥
तर्जनीमध्यमेकुर्याद्उभयत्रमहेश्वरि॥अंगुष्ठौसरलौकृत्वापार्श्वेयोजयेदिमां॥खेचरीयंमहामुद्रात्रै
लोक्यक्षोभकारिणी॥विजयाद्यंमहाबीजंमनुरस्याःप्रकीर्तिताः॥एषासमयमुद्रेयसर्वासांपरिकीर्ति
ता॥परिवृष्टोकरौदेवीत्वधर्वंद्राकृतीततः॥७०॥तर्जन्यंगुष्ठयुगलंयुगपत्कारयेदथ॥अधःकनिष्ठा
वष्टब्धेमध्यमेवतुयोजयेत्॥७१॥अनामिकेचकुटिलेसर्वाधस्तान्नियोजयेत्॥बीजमुद्रेयमाख्याताम
नुरस्याहसौमिति॥७२॥पूर्वोक्तयोनिमुद्रातुनवमीपरिकीर्तिता॥शक्तिरुदेस्फुरंतीयंतस्मात्साधारण

भवेत्॥७३॥वाग्भवंमनुरंतस्याअतोविश्वस्यमात्रका॥७५॥ ॥इतिश्रीदक्षिणामूर्तिसंहितायांयजनन्यासमुद्राविवरणनामषट्विंशतिःपटलः॥२६॥ ॥ईश्वरउवाच॥श्रीखंडरक्तश्रीखंडश्रीपर्णीसंभवेपुटे॥चक्रसंस्थापयेद्देवीनान्यत्रपरमेश्वरि॥१॥एवंविन्यस्तदेहःसन्ध्यायेद्ब्रह्मांडमंडलं॥क्षित्यंबुपावकाकाशविश्वरूपप्रकाशकं॥२॥चतुरस्रंचक्रोदंडत्रिकोणंतत्पुरमुरवं॥निरालंबमितिख्यातंमेतद्धेमेरुमंडलं॥३॥तस्योर्ध्वंव्यापकंचक्रंवाकूषकूपदर्पणं॥लीलावाग्वरत्वनिर्देशादपरायोगिषुस्मृताः॥४॥पराश्रीश्चाभवज्ञानेवानस्यत्येषुमध्यमा॥सर्वजंतुषुपश्यंतीवैखरीज्ञानयोनिषु॥५॥एवंवाक्पदसंपन्नसरत्नदलनीरजं॥एतस्योर्ध्वंपरंचक्रंपरपीयूषमंदिरं॥६॥चतुरस्रंह्यष्टपत्रंचतुःशातदलंशुभं॥दशपत्रंसहस्रारायुक्तारंलक्षपत्रकं॥७॥कोटिपत्रेषुशोभाढ्यंदीप्यमानंनभस्थले॥तत्कर्णिकामध्यपीठेसंस्मरेच्चक्रनायकं॥८॥महाषडध्वजननंस्फुरंतंसर्वतोमुखं॥षडध्वरूपमधुनाश्रृणुयो

गेन्द्रिसांप्रतं॥९॥पदाध्वाचक्रपत्रेषुभुवनाध्वात्रिसंधिषु॥वर्णाध्वामात्रकापीठेसर्वमंत्रविजृंभिते॥१०॥षड्भिरातत्वभरितंचक्रमत्रार्णरूपतः॥तत्वाध्वाकथितोदेवीतत्वरूपःसदाशिवः॥११॥पंचसिंहासनोन्नद्धःकलाध्वाचक्रशासनात्॥१२॥नवधाचक्रभरितात्थांत्यपरयायुक्ता॥षोडशार्णस्वरूपाचचक्रव्याप्यविजृंभते॥१३॥मंत्राध्वेतितदाख्यातोनीरजायतलोचने॥एवंषडध्वसंचारिश्रीचक्रंपरिचिंतयेत्॥१३॥कर्णिकायांपरंचक्रंतत्रचैतन्यमक्षरं॥तत्रस्थात्मपरंतत्रस्फुरणंबैंदवंततः॥१४॥तत्रस्वरूपममलंतत्रसत्वादिसंभवः॥चैतन्याकाशपीठंतुस्यात्मकांस्तनुशासनात्॥१५॥स्फुरणाद्दहुरीपीठंसुधापीठंलुचेंदवात्॥स्वरूपाद्रत्नपीठंतुतत्वाद्विश्वंप्रकीर्तितं॥१६॥श्रीविद्यापूजनस्थानेचक्रपूर्वादितःप्रिये॥महाकोटेश्वरीलंमंडितासनसंस्थिता॥१७॥सर्वसौभाग्यजननीपादुकांपूजयामिच॥इत्यक्ष्यार्यपरंज्योतिको

रांबीपूजयेत्सुधीः॥१९॥अनेनैवप्रकारेणपूजयेत्पंचपंचिकां॥एतत्सर्वात्मकंवस्तुसकलीनं
परंवस्तुनि॥२०॥तत्सर्वमात्मसंवित्तिःसैवस्यैभाग्यसुंदरी॥बिंदुत्रयसमायोगात्त्रिबिंदु
त्रिपुराश्रिता॥२१॥बिंदुसंकल्पयेद्दूर्ध्वंतस्याधस्तात्कुचद्वयं॥तदधस्तात्पराधंचचिंतयेत्तदधो
मुखं॥२२॥एवंकामकलारूपात्साक्षाद्क्षररूपिणी॥बिंदुत्रयार्धमात्राभिःकेवलंविश्वमा
का॥२३॥तत्तस्मात्कारणाद्देवीत्रिपुरात्रिरुच्यते॥अन्यासांत्रैपुरांबिंदुत्रयंनास्त्येवशारदे॥
यदिच्छयाभवेत्सृष्टिर्लयंतत्रैवगच्छति॥सैवदेवीमहेशानिस्वात्मानमितिचिंतयेत्॥२५॥ओजा
पूकामतांगाख्यामापीठोपरिसंस्थिते॥लिंधिसंख्याफणाहींद्रमध्यमौलिसरोरुहे॥२६॥तत्रस्थ
वेदवर्षाठेतत्रनित्याकलांबुजे॥तत्रकामेश्वरीपीठेनिषण्णीतत्संधर्मिणी॥२७॥आज्ञालोकत्रयेशानी
ब्रह्मविष्णीशशासनीं॥अकारादिक्षकारांतमंत्रावयवसुंदरी॥२८॥सकलादिब्रह्मरं ध्यानंविसतं
तुस्वरूपिणी॥उद्यद्भास्वत्समाभासांजपाकुसुमसन्निभां॥२९॥सद्यःसतप्तहेमाभांदाडिमीकु

सुमोज्वलां॥सर्गंधोद्दामकुसुमपूर्णभ्रमिलुराजितां॥३०॥तनुकेतकपरागनीलभ्रमरकुतलां॥
भंगरेखास्फुरन्मुक्तामाणिक्यतिलकोज्वलां॥३१॥स्फुरद्रत्नावलीरम्यंमुकुटीउवलत्किंकिणी॥
अलकैकस्फुरच्चंद्रवदनांविद्रुमाधरां॥३२॥राजत्पद्मकलास्फुर्तितिलकांचापसन्नुवां॥क
र्णचुंबिस्फुरन्नीलसोलाक्षीक्षेपसुंदरिं॥३३॥हारमुक्तावलीराजत्वर्णतांटंकराजितां॥
कर्णभूषणतेजोभिःकपोलस्थलमंजरीं॥३४॥मुखचंद्रोज्वलधुक्राकीरमौक्तिकभासिकां॥स्मि
तमाधुर्यविजितब्रह्मविद्यारसप्रभां॥राजद्धिरमवल्लीभबाहुवल्लीविराजितां॥रक्तोत्पलद
लाकारसुकुमारकरांबुजां॥३५॥करांबुजनखज्योत्स्नांवितानितनभस्थलां॥सद्रत्ननिबि
डोत्तुंगकुचभाराल्सांत्रिवलीं॥३६॥नवमुक्तामहाहारपदकोन्नतवक्षसं॥क्षीणोदरींनिम्न
नाभींक्षाममध्यमसुंदरीं॥३७॥अनर्घ्यरत्नघटितमेखलालग्नकिंकिणीं॥नितंबबिंबसु
भगांरोमराजीविराजितां॥३८॥रक्तांशुकस्फुरत्तेजोव्याप्तत्रैलोक्यमंडलीं॥दिव्यकंचुकसं

राजद्रत्नचित्रविचित्रितां॥३८॥कदलीललितस्तंभकुसुमारोररराजितां॥नवरत्नस्फुरत्तेजो
मंजरीव्याप्तदेवतां॥३९॥ब्रह्मविष्णुमहेशानस्फुरन्मौलिपदांबुजां॥कर्पूरसकलोन्मिश्रतां
बूलापूरितानना॥४०॥प्रवालवल्लीघटितपादेक्षोमगुणान्वित॥द्वितीयाचंद्ररेखांकरणिमा
कर्षणक्षमं॥४१॥सद्दीपाभ्रमरीभूतगुणमिक्षुशरासनं॥कमलाकारसंराजत्पंचबाणाश्च
बिभ्रतीं॥४२॥महाश्टंगमदोद्गारकुंकुमारुणविग्रहां॥सर्वाभरणशोभाढ्यांसर्वालंकाररा
जितां॥४३॥सर्वदेवमयींचैवसर्वशास्त्रमयींप्रिये॥सर्वदेवमयींदेवींसर्वाचारस्वरूपिणी॥
सर्वसौभाग्यजननींसर्वसौभाग्यसुंदरीं॥४४॥सर्वचर्णमयीदेवींसर्वविद्यास्वरूपिणी॥एवं
ध्यायेन्महादेवींकदंबवनमध्यगां॥४५॥वह्न्याडीपुटहूरेणागतांचिंतयेत्ततः॥कामेश्वरवि
वस्यांकेरूढापरेलुलसंदरीं॥४६॥विद्याज्ञानस्वरूपिण्यामुद्यान्चतथाप्रिये॥मुद्रांसंदर्श्ये
द्विद्यांसर्पणंचत्रिधायजेत्॥४७॥सर्वोपचारैराराध्यमानसेःप्रकटेःशुभैः॥धूपदीपनिवे

वेद्यांतेपुनर्मुद्रांसंदर्शयेत्॥४८॥पुनःसंतर्प्यदेवेशींतिथिवित्यांप्रपूजयेत्॥एतस्मिन्समये
देवीतत्रतिथिमयींयजेत्॥४९॥प्रतिपत्पौर्णमास्यांतमेकैकांपूजयेत्तुयः॥सोभाग्यंलभतेमं
त्रीमहदैश्वर्यमश्नुयात्॥५०॥एकाद्यैकध्यानान्याचदशांतिक्रमतोयजेत्॥विभाव्यचमहा
स्त्रस्वरैःपंचदशात्मकैः॥५१॥पंचपंचविभेदेनसर्वांतिमध्यमंयजेत्॥मध्येदेवीमयेदेवीं
महानित्यांप्रपूजयेत्॥५२॥कामेश्वर्यादिकानित्याविचित्रांताःक्रमाद्यजेत्॥विमलाजयि
नीमध्येपूजयेद्गुरुमंडलं॥५३॥परास्यादिव्यगुरवःसिद्धादेवीपरापराः॥अपरामानवाज्ञेया
मुनिवेदाष्टसंख्यया॥५४॥आनंदनाथशब्दांताःपुरुषाःपरिकीर्त्तिताः॥अंबांतगुरवोज्ञेया
स्त्रीलिंगाःपरमेश्वरी॥५५॥कामराजस्यगुरवःकथंतेश्शृणुसुंदरी॥परप्रकाशसंज्ञश्चत्त
तःपरशिवोगुरुः॥५६॥परशक्तिश्चकोलेशश्चक्रादिव्यंबिकामथा॥कुलेश्वरीतथादेवीकामे
श्वर्यंबिकागुरुः॥५७॥अथभोगस्तथाक्लिन्नःसहजासमयस्तथा॥गगनोविश्वविमलोमदनी

भुवनोगुरुः॥५७॥लीलास्वात्मप्रियोदेवीक्रमेणपरिकीर्त्तिताः॥लोपामुद्रागस्त्ययोश्चर्या
रेपर्यसमोभवेत्॥५८॥परमाद्यशिवःपश्चात्कामेश्वर्यंबिकातताः॥दिव्योघश्चमहौघश्च
सर्वश्चगुरवःक्रमात्॥५९॥तथाप्रज्ञाप्रकाशस्कचतुष्कंकथतेशृणु॥दिव्यश्चित्रश्चैकेवला
दिव्यंबाचमहोदयः॥६०॥चिद्विश्वशक्तिश्चरकः कमलश्चमनोहरः॥परमात्मागुरुहंहूप्रति
भोष्टोतुमानवे॥६१॥अन्यासांसर्वविद्यानांसमानगुरवःक्रमात्॥अथोपरप्रकाशश्चपरा
दिविस्फुरास्तथा॥६२॥तृतीयोपरमेशानिकामेश्वर्यंबिकामला॥मोक्षश्चामृतसंज्ञश्चपुरु
षोघोरएवच॥६३॥अथवामःसद्गुरुश्चसिद्धौघश्चांतिमःक्रमात्॥उत्तरःपरमश्चेचसर्वज्ञः
स्वरूपएवच॥६४॥सिद्धः स्तथाचगोविंदःशंकरोमानवौघकाः॥॥अलिंत्रयावसानेषुस्व
गुरुत्रितयंयजेत्॥६५॥यष्ट्वाह्यादशसंख्याकागुरवःसंभवंतिहि॥मानवौघाष्टकांतेतु
पुष्पसंकोचयेत्तदा॥६६॥गुरुत्रयंतदायोज्यमन्यथानष्टसंततिः॥जालोमंत्रीततोदेवी १४

पंत्स्महेनिभवत्यसौ॥६७॥अन्यथागुरुसंकोचोनकर्तव्यः कदाचन॥पारंपर्यविहीनायेज्ञा
नमात्रेणगर्विताः॥६८॥तेषांसमयलोपेनकिंकुर्वंतिमरीचयः॥गुरुविनाक्रमंयस्कुरुतेपरमेश्वरि॥६९॥महाहानिस्तस्यदेविजायतेनात्रसंशयः॥अलित्रयेणगु
रवःसंपूज्याःसिद्धहेतवे॥७०॥गुरुमंत्रेणनाम्नापिनिजंसंतर्पयेद्गुरुं॥७१॥ ॥इतिश्री
दक्षिणामूर्तिसंहितायांध्यानादियजनविधिर्नामसप्तविंशतिः पटलः॥२७॥ ॥ईश्वर उ
वाच॥अथवक्ष्येमहेशानिश्रीविद्याःक्रममुत्तमं॥अग्नीशासूरयायम्यमध्येदिक्ष्वंगपूजनं॥
१॥स्वस्वमुद्राक्रमेणैवपूजयेन्मनुवित्तमः॥भूर्बिंबषोडशारंचवसुपत्रंक्रमेणतु॥२॥वृ
त्तिचक्रंभवेत्तत्रपूजनंकथतेप्रिये॥श्रीपरंज्योतिराद्यश्चसर्वंसंपूजयेत्क्रमात्॥३॥मन्त्र
स्त्रिदशकोणंचद्वितीयंदशकोणकं॥स्थितिचक्रंविभेदेनपूजयेदथतत्तथा॥४॥अष्टकोणंत्रिकोणंच

वैदंवसंततिर्भवेत्॥तृतीयाःसकलाःपूज्याश्चतुर्थंसकलंभवेत्॥५॥तुर्याविद्यास्तुसकलाःपूज
येत्क्रमतःसुधीः॥अनेनैवप्रकारेणविद्याश्चंद्रंप्रपूजयेत्॥६॥श्रीकोशसिंहासनगंतथाकल्पल
तात्मकं॥तथारत्नात्मकंदेविचतुरायतनात्मकं॥७॥चतुरन्वयगंभीरंसर्वंसंपूजयेत्सुधीः॥त्रैलो
क्यमोहनेचक्रेपंचाशद्वर्णविग्रहे॥८॥प्रकटास्तत्रसंपूज्यासिद्धयोदशसुंदरी॥सद्यःसंक्षोभहेमा
भाःपाशांकुशाधराःप्रिये॥९॥महाभांडाररत्नानिसप्तवर्णानिवेनिधीन्॥प्रयच्छंत्यःसाधकेभ्यः
पद्महस्ताश्चपूजयेत्॥१०॥अणिमालघिमासिद्धिर्महिमेशित्वरूपका॥वशित्वसिद्धिःप्राकाम्या
भुक्तिरित्यष्टमीभवेत्॥११॥प्राप्तिसिद्धिःसर्वकामासिद्धयःप्रकटाथजेत्॥द्वारदक्षिण
भागेषुतथाकोणेषुचक्रमात्॥१२॥अधऊर्ध्वक्रमात्पूज्याःपश्चिमादिषुदेविकाः॥ब्राह्मीमा
हेश्वरीचैवतथैंद्राणीतृतीयके॥१३॥कौमारीवैष्णवीचैवषष्ठीवाराहिकाभवेत्॥चामुं
डाचमहालक्ष्मीरष्टौचभोगतः॥१४॥पाशांकुशाधराःसर्वाःक्रमेणदधतीस्मरेत्॥वि

२

द्यान्निश्चलंवज्रंचशक्तिंचक्रंगदांतथा॥१५॥वैर्यंत्रमालिकांपद्मंक्रमेणपरमेश्वरि॥सर्वाभ
रणसंपन्नाःसंस्मरेत्सिद्धिहेतवे॥१६॥सर्वसंक्षोभिणीसर्वद्राविणीसर्वकर्षिणी॥सर्वव
शंकरीसर्वोन्मादिनीसर्वपूर्विका॥१७॥महांकुशासर्वपूज्यारवेचरीसर्वपूर्विका॥बीजमु
द्राचसर्वाद्यायोनिमुद्राचमध्यतः॥१८॥पाशांकुशाधराःसर्वाःसर्वाभरणभूषिताःमध्य
श्चिमादिक्रमेणैवमकथश्चलुरस्रके॥१९॥सर्वाशापूरकेचक्रेकलास्वरविभेदतःपश्चि
मादिषुलोमेनपूज्याःसंपूजयेत्क्रमात्॥२०॥कामाद्याकर्षणींनित्यांबुध्याकर्षिणिकांततः॥
रसाकर्षिणिकांदेविगंधाकर्षिणिकांतथा॥२१॥चित्ताकर्षिकांतहृद्धैर्याकर्षिणियांप्रिये॥स्मृ
त्याकर्षिणीकांचैवबीजाकर्षिणिकांतथा॥अमृताकर्षिणिंचैवसरत्याकर्षिणिकांप्रिये॥शरी
राकर्षिणिनित्यामात्माकर्षिणिकांततः॥एतानित्याःकलादेविचंद्रमंडलमध्यगाः॥२२॥
अहंकाराकर्षिणीपश्चाद्बाकर्षिणिकांतथा॥स्पर्शाकर्षिणिकांतहरूपाकर्षिणिकांततः॥४.४

स्वरलग्नाः स्मरेन्नित्यंस्रवत्पीयूषवर्षिणी॥ पात्रांकुशासधापूर्णक्षीरघटदानदाः॥२३॥स
र्वसंक्षोभणेचक्रेकादिलक्षांतवर्णिणी॥ देवीणमंतरापूज्यावंधूककुसुमप्रभाः॥२४॥पात्रांकुश
स्फुरन्नीलनीलोत्पलकराः स्मरेत्॥ पूर्वादिक्षुचतुर्दिक्षुकोणेष्वग्न्यादिषुक्रमात्॥२५॥अनं
गकुसुमाचैवतथानंगादिमेखलां॥ तथानंगादिमदनामनंगमदनातुरां॥२६॥अनंगरेखांचावं
गांचानंगपूर्विकां॥ अंकुशांचतथानंगमालिनींपरमेश्वरीं॥२७॥महासौभाग्यदेचक्रेकटवर्णविरा
जिते॥ संप्रदायाख्ययोगिन्यः सर्वाभरणभूषिताः॥२८॥इंद्रगोपनिभाः सर्वासगर्वोन्मत्तयौवनाः॥प
द्मांकुशोदर्पणंचपानपात्रंसुधामयं॥२९॥बिभ्रत्यः सर्वसुभगाः पश्चिमादिविलोमतः॥त्रैलोक्यश्र
यूजयेद्देविसंप्रदायैनसिद्धये॥३०॥सर्वसंक्षोभिणीशक्तिः सर्वविद्राविणीततः॥सर्वाकर्षिणिकाश
क्तिः सर्वह्लादकरीप्रिये॥३१॥सर्वसंमोहिनीशक्तिः सर्वस्तंभनकारिणी॥सर्वजृंभनिकानामश
क्तिः सर्ववशंकरी॥ सर्वार्थरंजनीशक्तिः सर्वोन्मदनकारिणी॥सर्वार्थसाधकीशक्तिः सर्वसंपत्तिपू

१६

चक्रे

रिणी॥३२॥सर्वमंत्रमयीशक्तिः सर्वदुःखसंकरी॥ सर्वार्थसाधकीशक्तिः सर्वभवर्णविशोभिते॥३३॥
जपकुसुमसंकाशाः स्फुरन्मणिविभूषिताः॥ महासौभाग्यगंभीराः पीनरत्नपयोधराः॥३४॥रत्न
पेटीविनिक्षिप्तसाधकेप्सितभूषणान्॥ नानारत्नमयान्दिव्यान्दधतीर्हसिताननाः॥३५॥पात्रां
कुशोचदधतीसंस्मरेत्रयोगिनी॥ पश्चिमादिविलोमेनपूजयेत्सर्वसिद्धिदाः॥३६॥सर्वसिद्धिप्र
दादेवीसर्वसंपत्प्रदातत्॥ सर्वप्रियंकरीचैवसर्वमंगलकारिणी॥३७॥सर्वकामप्रदादेवी
सर्वदुःखविमोचनी॥ सर्वमृत्युप्रशमनीसर्वविघ्ननिवारिणी॥३८॥ सर्वांगसुंदरीदेवीस
र्वसौभाग्यदायिनी॥ सर्वरक्षाकरेचक्रेमक्षवर्णविराजिते॥३९॥पश्चिमादिविलोमेन
निगर्भयोगिनीर्यजेत्॥ उद्यत्सूर्यसहस्राभामुक्तालंकारभूषिताः॥४०॥पात्रांकुशपु
स्तकज्ञानमुद्रावरलसत्कराः॥ देवीप्रपूजयेदेतायथेप्सितफलप्रदाः॥४१॥सर्वज्ञासर्वश
क्तिश्चसर्वैश्वर्यफलप्रदाः॥ सर्वज्ञानमयीदेवीसर्वव्याधिविनाशनी॥४२॥सर्वाधारस्व

वाचसर्वापहरातथा॥सर्वानंदमयीदेवीसर्वरक्षास्वरूपिणी॥४३॥सर्वेप्सितार्थफलदाद्वाग्भ
परमेश्वरी॥सर्वरोगहरचक्रेवर्गाष्टकविजृंभिते॥४४॥पश्चिमादिविलोमेनरहस्ययोगिनी
र्यजेत्तू॥श्रीपीठपरितोधस्ताद्दाडिमीकुसुमप्रभाः॥४५॥रक्तवस्त्रपरिधानारक्तगंधानुलेपनः॥
रक्तपुष्पाक्षतैःसम्यक्पूजयेत्सर्वसंवृद्धिदाः॥४६॥नानाभरणगंभीराः पंचबाणधनुर्द्धराः॥
पुस्तकंवरदानंचदधतीवर्गसंस्थिताः॥४७॥वर्गाष्टकमहाबाणान्बिंदुनादांकितान्लिखेत्॥
अवर्गंतिरेफलक्ष्मावामकर्णेंदुबिंदुमत्॥४८॥देवीवाग्देवतापूजापद्मानीनामसुंदरी॥कवर्गं
तेकलयुतांपरांकामेश्वरींलिखेत्॥४९॥चवर्गंतेनवक्ष्माढ्यंवामनेत्रेंदुसंयुतं॥अनेनमो
हिनीपूजापटवर्गंततःपरं॥५०॥वायुक्ष्मवामकर्णेंदुबिंदुमद्विलयांयजेत्॥तवर्गंतेज
कालाग्निवामाक्षींदुकलात्मकं॥५१॥अरुणांपूजयेद्देविप्रवद्यंतिचकथ्यते॥व्योमजीवमह
नीरवरयुचंद्रंचभूषितं॥५२॥अनेनजयिनीपूजापवर्गंतिथकथ्यते॥इरेफकाक्षुपचनप्र

णवांकेनपूजयेत्॥५३॥सर्वेश्वरींश्रावर्गंतिक्ष्मवह्निसबिंदुमत्॥अनेनकौलिनीदेविपूजये
दष्टमींपुनः५५४॥अष्टकांतेमहाज्ञानिएतावद्देवतायजेत्॥सर्वसिद्धिप्रदेचक्रेत्थंकैश्रयसह
क्षरैः॥५५॥त्रिरेखागर्भगोभाव्येसमस्तास्तुविजृंभिते॥परापररहस्याख्यायोगिनीःपूजयेत्क
मात्॥५६॥पश्चिमादिक्रमेणैवयुग्मयुग्मविभेदतः॥कामेश्वरस्यचकामेश्र्यावर्णाःसाधारणाःप्रि
येः॥५७॥नवार्यंतद्वितीयंचबिंदुनादांकितंक्रमात्॥कामेश्वरस्यकामेश्र्याश्चापयुग्मंयजेत्प्रिये॥
अनंतोबिंदुनादाढ्योदक्षेखापादियुग्मकं॥कामेश्वरस्यकामेश्र्याःक्रमेणपरमेश्वरि॥५९॥अंकुश
स्तुसमानस्यादुभयोःपूजयेत्सुधीः॥चतुर्दिक्षुविशेषाभाव्यायौवनोन्मत्तविग्रहाः॥६०॥रक्तवि
द्रुताकाराउद्दामकुसुमान्विताः॥नवरत्नविशेषाढ्यास्वस्वायुधधराःक्रमात्॥६१॥जृंभमोहनि
श्चस्तंभपदमात्रान्वितशुभाः॥अंगावरणबाह्येतुआयुधाष्टकमर्चयेत्॥६२॥कोणत्रयेषुसंपू
ज्यातिस्रःकूटत्रयान्विताः॥कामेश्वरीचवज्रेशीतृतीयाभगमालिनी॥६३॥कामेश्वरीशुकूल

र्णांशुकुमाल्यानुलेपना॥मुक्ताफलस्फुरद्रूपानानाभरणभूषिता॥५५॥पुस्तकंचाक्षसूत्रंचवर
दंचाभयंक्रमात्॥दधतीवाग्यतःपूज्यारुद्रशक्तिःप्रकीर्तिता॥५६॥वज्रेश्वरीकुंकुमाभास्फुरद्रत्न
विभूषिता॥बालार्कवसनानीलकर्णचुंबितलोचना॥५७॥इक्षुकोदंडपुष्पेषुवरदाभयहस्तिका॥
वज्रेश्वरीदक्षभागेविष्णुशक्तिर्महेश्वरी॥५८॥उत्तरेभगमालाबासद्यःसंतप्तहेमभा॥अनर्घ्यरत्न
रचितभूषणाभुवनेश्वरी॥५९॥पाशांकुशज्ञानमुद्रावरदानकरांबुजा॥ब्रह्मशक्तिर्महेशानित्रितापत्र
यनिकृंतनी॥६०॥सर्वानंदमयेनादरूपेशब्दातिगोचरे॥परापररहस्याख्यायोगिनीरतिपूर्वका॥
त्रिकूटायानुसंपूज्यमहात्रिपुरसुंदरी॥श्रीविद्यांपूजयेद्देवीचिन्मयीब्रह्मरूपिणीं॥६१॥तर्पणा
न्निपुनर्दद्यात्गंधपुष्पाक्षतैर्यजेत्॥मानसैःप्रकटैर्विपूजयेद्बहुभिःप्रिये॥६२॥मुद्राःसंदर्शयेन्म
त्रीबंधूकुंकुमप्रभाः॥नानालंकारसुभगांत्रैलोक्यवशकारिणी॥६३॥स्वस्वमुद्राकराःसर्व
श्रीविद्यांसमुखांस्मरेत्॥प्रतिचक्रंतुमुद्रास्तुक्रमाच्यन्त्रेश्वरींयजेत्॥६४॥तत्त्रयंत्रस्यमध्ये

तुवास्यपूजाग्रतःप्रिये॥त्रिपुरास्फटिकाभासमुक्तारत्नविभूषिता॥६५॥पुस्तकंचाक्षमालंचव
रदंचाभयंक्रमात्॥दधतींचिंतयेन्नित्यंमहापातकनाशिनीं॥६६॥त्रिपुरश्रीःपूर्वरूपासुंदरीकुंकुम
प्रभा॥सर्वालंकारसंपन्नापुस्तकंचाक्षमालिकां॥६७॥वराभयौचदधतीसामर्थ्यहसितानना॥
अनयासदृशीदेवीध्येयात्त्रिपुरवासिनी॥६८॥अरक्तलोचनांप्रांतेमहामदविघूर्णितां॥त्रिपुर
श्रीमहेशानीपीनरत्नघनस्तनीं॥६९॥उद्यद्भास्वत्सहस्राभांदिव्यालंकारमंडितां॥पुस्तकंजप
मालांचवरदंचाप्रयंकरैः॥७०॥दधतींसकलानंदामालिनीकथ्यतेधुना॥इंद्रगोपप्रभांदे
वीपाशांकुशकपालिनीं॥७१॥महाभीतिहरासम्यक्साधकानांक्षणाद्भयं॥सिद्धांबापरमेशा
नींध्यायेद्भयविनाशिनीं॥७२॥अंबिकांचतथादेवित्पूजयेत्परमेश्वरि॥संपत्प्रदाभैरवीव
महासिद्धिप्रदायिनीं॥७३॥क्रमेणसिद्धिसहितांप्रतिचक्राधिदेवतां॥अतिगुह्यरमेवेदंज्ञा
त्वाचक्रंसमर्चयेत्॥पादुकांपूजयामीतिनमस्कारोथवाभवेत्॥७४॥स्वाहाहोमेतर्पणेनुत

र्पयामीतिसंस्मरेत्॥अथवारत्नमयःसर्वादेवीरूपेणचिंतयेत्॥८॥श्रीचक्रेपरमेशानिरयंत
त्रेस्वस्थसंन्निभः॥गोपनीयंत्वयाभद्रेस्वयोनिरिवपार्वति॥९॥ ॥इतिश्रीदक्षिणामूर्त्तिसं
हितायांश्रीविद्याविवरणंनामाष्टाविंशतिःपटलः॥२८॥ ॥ईश्वरउवाच॥नैवेद्यंषड्रसोपेतं
कामधेनुपवित्रितं॥दत्वाकर्पूरसहितंताम्बूलंपरमाक्षये॥१॥नित्यहोमंप्रकुर्वीतपूर्वोक्तविधि
नाप्रिये॥यथान्नाग्निजपंकुर्यात्कृतिंचपरमेश्वरी॥२॥आर्द्धश्लोकद्वयेनाविनत्वासोभाग्यद
वतां॥सौवर्णराौप्यकांस्यादिपात्रेवसुदलंलिखेत्॥३॥गंधेनचारुकंमध्येमुद्रांवानत्रवि
न्यसेत्॥वसुयत्रेषुचाज्येनपूरितान्नवदीपकान्॥४॥भ्रामयेत्प्रणवविद्याभिस्त्रिधाधृत्वा
तुमस्तके॥मूलेनवास्मरेद्देवीसर्वविघ्नोपशांतये॥५॥समस्तचक्रचक्रेशीयुक्तेदेविनवा
त्मके॥आरात्रिकमिदंदेविगृहाणममसिद्धये॥६॥मंडलंवामतःकुर्यात्साधकोभुविजानुमा
न्॥वहत्पुटेणहस्ताभ्यांमंडलोद्धारलक्षणं॥७॥चतुरस्रेव्योमचक्रंमंत्रेणानेनपूजयेत्॥ता

रंचभुवनेशानिव्यापकाग्निचमंडलं॥८॥डेःतंवाग्भवेत्कंमंत्रोमनुःसूर्याक्षरोभवेत्॥अन्नोद
मिस्रभागेनसाधारंपुष्पपूजितं॥९॥संस्रुग्प्यपात्रंतत्रैवकुलाणेनबलिंहरेत्॥तारंविनास
र्वविघ्नक्षयःसर्वत्रभूलिखेत्॥१०॥तेभ्योहुंवन्हिजायाचत्रिवारोच्चारणाद्बलिः॥पूर्वोक्तब
लिदानंचकुर्याद्विघ्नोपशांतये॥११॥चतुर्थाबलिदानंतत्त्रिपुलोकेषुदुर्लभं॥ततःकुमारीसंत
र्प्यत्रिपुरेशानयाथवा॥मूलेपान्परमेश्वर्याःसंभाव्यमनुवित्तमः॥स्वेच्चयात्रात्मचक्रस्यस्वामिनी
संविदंपरां॥१३॥योजयेदात्मविज्ञानगहनेकृपयागुरोः॥शिवकोणेत्रिकाभ्योनिर्मात्स्य
सिद्धयेक्षिपेत्॥१४॥अर्घ्यपात्रंततोदद्यादेवीगुरवेगुरुमंत्रवित्॥नाममंत्रेणचस्वस्त्रंतर्पयेदुप
देशतः॥१५॥वाममार्गेणदेवेशितत्वमुद्राधरःशुचिः॥पुनरारात्रिकंकुर्यादाचारेद्दीपभक्षणं॥१६॥
आरात्रिकस्यमध्यस्थंमूलेनैवतुभक्षयेत्॥कपालिन्यावापिपात्रंनत्वापावासमुद्धरेत्॥१७॥
द्वितीयंनत्वयादेशेसंयोगेनैवपार्वति॥तत्त्वत्रयेणसंयोगात्तर्पयेत्स्वांतवासिनीं॥१८॥प्रथमं

मंत्ररूपंतुद्वितीयंसर्वमंत्रवित्॥तृतीयंमीशरूपंचविज्ञेयंमनुवित्तमे॥१९॥किंचिदुद्दुर्ध्यमुद्रा
भिःपंचभिःपरमेश्वरि॥श्रीगुरोराज्ञयादेविस्वयंश्रीपुराभवेत्॥२०॥अधोमुखानिसर्वाणिप
त्राण्यग्रेप्रतिष्ठयेत्॥आद्यूष्मंत्रान्तत्रस्जान्नोषिकाभ्योक्षतादिकं॥२१॥दत्वातुपरमेत्राणि
स्करीभूयान्नसंशयः॥अनिर्वाच्यमपिज्ञेयमक्षरैःकथितंमया॥२२॥जलाक्षरेणन्यायेनचंद्रदी
पेनचप्रिये॥गोपीतप्लवयाभद्रेजननीजारगर्भवत्॥२३॥ ॥इतिश्रीदक्षिणामूर्तिसंहि
तायांबलियजनविधिनामैकान्नत्रिंशत्पटलः॥२९॥ ॥श्रीपार्वत्युवाच॥होमादिसर्वं
तंदेवसम्यग्विस्तारितंनहि॥साधकानांहितायत्वंसिध्यर्थंकथयप्रभो॥१॥ईश्वरउवाच॥
शृणुदेविप्रवक्ष्यामिश्रीविद्यामंत्रसाधनं॥रामीडूर्वांकुराश्वत्थपल्लवेरर्कसंभवैः॥२॥श्रीच
क्रंपूजयेद्देवीमासमात्रंसमाहितः॥सहस्रजन्मजंपापंहंतिमासेनदेशिक॥३॥पूजयेद्रत्न
खचितैश्चंपकैःस्वर्णजैःप्रिये॥सरम्यैःसर्वकालेषुसर्वज्ञानधरोभवेत्॥४॥नान्नायैत्पर

मेत्राणिकोटिजन्मभवान्यपि॥समुद्रवलयांपृथ्विंसंप्राप्यसरवमेधते॥५॥नित्यंय
पूजयेद्देवींचंपकैरजतोद्भवैः॥सबुद्धिमान्भवेद्देविसर्वत्रविजयीभवेत्॥६॥पश्चिमाभिमु
खंलिंगंवक्त्रशून्यमथापिवा॥स्वयंभ्वाणदेशेवाशैवस्थानेमहेश्वरि॥७॥तत्रस्थित्वाज
पेन्मंत्रंप्रवालाक्षस्रजाथवा॥मुक्तारुद्राक्षपद्माक्षस्फटिकोद्भवयाथवा॥८॥माणिक्य
पद्मरागादिमनोहर्यजपेद्बुधः॥जपेल्लक्षैकमात्रेतुभूचर्योविघ्नकारका॥९॥तासामपि
यदानासैक्षेलक्षंयातिमनागपि॥तदालक्षत्रयंकुर्यान्नियमेनशुचिर्बुधः॥१०॥मानसेना
थवावाचोपांशुनावाजपेच्छुचिः॥मानसेत्वारणंदेविजपकोटिफलप्रदं॥११॥उपांशुच्चा
रणंदेविवाचिकाच्छतधाभवेत्॥वाचिकंतुसमात्रंस्याद्गुरोराज्ञयाप्रिये॥१२॥तद्दशां
सेन होमस्यात्कुसुमैर्ब्रह्मवृक्षजैः॥कुसंभपुष्पैर्जुहुयान्मधुरत्रितयाप्लुतैः॥१३॥जपा

भिः करवीरैर्वारक्तैर्जात्तीप्रसूनकैः॥ तस्माद्भवतिविद्येयमविद्याध्वंसिनीसतां॥ योनिकुंडेभगाक्ष
रैर्वृत्तलेहृद्द्वयोः प्रिये॥१४॥ नवत्रिकोणचक्रेचचतुरस्रेथपद्मके॥ वाक्पतियोनिकुंडेतुभगेचाक
र्षणंभवेत्॥१५॥ वृत्तलंश्रीपदंदेविवश्यार्थेतुत्रयंभवेत्॥ नवत्रिकोणेमहतीरक्षेचरीसिद्धिभा
गभवेत्॥१६॥ चतुरस्रेतुसकलंशुभजातंभवेत्सदा॥ रंगेतिकंपौष्टिकेलक्ष्मीरारोग्यंचसरस्वादि
कं॥१७॥ पद्मांकेदद्यासिद्धिस्कुपद्मायेन्नात्रसंशयः॥ मल्लिकामालतीभिश्चत्रिमध्वक्तैर्वच
स्पतिः॥१८॥ करवीरजपपुष्पैःसघृतैर्भुवनत्रये॥ योषिद्वश्यंततोदेविकर्पूरंकुंकुमंमदः॥१९॥
मृगस्यमिश्रितंसूक्ष्मंकायसौभाग्यभाग्भवेत्॥ चंपकैर्यैःपाटलैरम्बेराम्रैरन्यफलैर्हुनेत्॥२०॥
सप्ताहंमासमात्रंवालक्ष्मीःप्राप्नोतिमंत्रिणं॥ श्रीखंडमगरुंदेविकर्पूरंरंगुगुलुंहुनेत्॥२१॥ समस्त
करसंदर्योविवश्यास्तस्यभवंतिहि॥ हुनेत्पलंत्रिमध्वक्तंरक्तचरुंचतुष्पथे॥२२॥ दधिक्षीरम
धुभिन्नलाजैर्हुत्वालुकालभाक्॥ अथवानवलक्षंलाजपेद्विद्यांसमाहितः॥२३॥ तद्वद्गंसेनहो

मस्कृत्पूर्वोक्तविधिनायजेत्॥ साधयेत्सर्वभूलोकपातालतलवासिनः॥२४॥ राजिकालवणा
भ्यांलुक्षोभयेज्जगतीमिमां॥ दध्याज्ञाताष्टकंहुत्वाकालमस्तंविनाशयेत्॥२५॥ घृतक्षीरह्र
यादायुततोष्टशतकंहुनेत्॥ मध्याज्यगुग्गुलुनेवराजेंद्रवश्यमानयेत्॥२६॥ आरोग्यंघृतदुर्वा
भ्यांहवनेनशताष्टकं॥ त्रिमध्वक्तैरक्तवर्णैःकरवीरैःसगुग्गुलैः॥२७॥ हुनेल्लक्षंवशीकुर्याद्भू
पतिंधरणीभुजं॥ मध्वक्तकरवीरस्तसंगंभूपंवशंनयेत्॥२८॥ सप्तरात्रेणवाज्येनशान्तिनः पू
र्ववद्यजेत्॥ पाटलैर्यूथिकाकुंदैर्जातिभिःशालपत्रकैः॥२९॥ मालतीर्नववल्लीभिःमल्लिकाप
ल्लविंशुकैः॥ एजनाद्धवनाद्वापिमिश्रितैर्वाप्यमिश्रितैः॥३०॥ सर्वसौभाग्यमाप्नोतिबुधा
वाक्पतिरुच्यते॥ सुचुकुंदैर्बिल्वपत्रैःफलैरसितनीरजैः॥३१॥ नगरेराजचंपेश्यासद्वयो
टोभवंतिहि॥ नारिकेलैश्चखर्जूरैर्द्राक्षाभिश्चलपल्लवैः॥३२॥ मनसाचिंतितंकार्यंसाध
कस्यतुहोमतः॥ एजनेनचहोमेनश्रीविद्यांपरितोषयेत्॥३३॥ चरुंविकीर्यसर्वत्रकुमारी

पूजनादिभिः॥पूर्वोक्तबलिदानेनगुरुंसंतोष्यचक्रमात्॥३४॥सूचासिनिश्चयंसंपूज्यद्द्याद्दक्षिणांधनंसतां॥समग्रंकुसुमहोमेकूष्मांडंबहुधाहुनेत्॥३५॥नारिकेलांतरफलैःसकलैश्चमनप्रिये॥समग्रेणैवचूतस्यफलेनबदरंतथा॥३६॥पनसीफलगर्भस्तैर्गरिबीजोज्झितैर्हुनेत्॥जंबूफलसमग्रंस्याद्राक्षांश्चैवंतथाहुनेत्॥३७॥रंभाफलंमनोभागंलघुचेरवंडितंनहि॥फलंलघुसमग्रंस्यात्कस्करीकुंकुमंतथा॥३८॥गुंजामात्रंहुनेद्दधित्तिलराजिंतथाहुनेत्॥तथैवलवणंलाजामुष्टिमात्रंहुनेद्बुधः॥३९॥अन्नंतुग्रासमात्रंहियक्कान्नेश्चतथाहुनेत्॥पुरंलुक्रमुकार्द्धेनश्रीखंडंक्रमुकात्मतिः॥४०॥तथागरुंहुनेदाज्यंमनःसंतोषकारिच॥तच्चलुर्गुणभेदेनदधिदुग्धेहुनेतथा॥४१॥सर्वासामाहुतीनांतुमानःदेविमनःप्रिये॥कुंडस्यपूजनंवक्ष्येमहाविघ्नविनाशनं॥४२॥चतुर्विंशतिसंख्याभिरंगुलिभिःसविस्तृतं॥खातंचरचयेत्कुंडंसर्वत्रसमनोहरं॥४३॥चतुरस्रंसर्वनेत्रसुभगंमेखलान्वितं॥सर्वत्रैकांगुलिंत्यक्त्वातिरश्रःकार्यासुरो

भनाः॥४४॥आदित्यवसुदेवानांसंख्यांगुलिभिरुन्मता॥चतुरंगुलविस्तारास्तिस्त्रोपिपरमेश्वरि॥४५॥कुंडस्यपश्चिमेभागेयोनिंकुर्यात्सुशोभनां॥त्र्यंगुलेषुविस्तारांत्रयंगुलिषुविस्तृतां॥४६॥मध्येषडंगुलांदेविद्व्यंगुलोच्चांमनोरमां॥लक्षणंचतुरस्रस्यकथितंतवसुंदरि॥४७॥एतस्मिन्मातियद्दान्यत्यतदन्येषुयथाभवेत्॥तेनमानेनसर्वाणिकुंडानिरचयेद्बुधः॥४८॥गोमयोदकसंलिप्तेपूर्वास्यश्चिमदिग्गताः॥दक्षिणाद्युत्तरांतास्तरेरवास्तिस्रश्चकारयेत्॥४९॥प्रणवेनाभ्युक्ष्यमध्येकल्पयेद्यागविस्तरं॥शर्कराविकिरेतत्रत्रिकोणंतत्पुटंलिखेत्॥५०॥तद्बहिर्वसुपत्रंचततोभूमंडलंलिखेत्॥उपर्युपरिभेदेनपीठंतत्सर्वमर्चयेत्॥५१॥मंडूकंचतथाधारंकालाग्न्याद्यंततःपरं॥आधारशक्तिंकूर्मंचततोनंतंवराहकं॥५२॥पृथिवींचतथाकंदंनालंपद्मंचकर्णिकां॥पत्राणिकेसराण्येवततस्तानेषुपूजयेत्॥५३॥धर्मंज्ञानंचवैराग्यमैश्वर्यंपीठ

दिक्षुच॥वक्षस्थलस्तेचकोणेषुपीठस्यउपरिपूजयेत्॥५४॥पुनस्तारेणसंपूज्ययागशिष्टरकंयजेत्॥
मध्येऋतुमतींविश्वमातरंवेदमातृकां॥५५॥पुरुषाराधितांध्यात्वातद्योनौसंपुटस्थितं॥वह्निं
कुंडेपरिभ्राम्यकिंचिदंगारकंत्यजेत्॥५६॥अस्त्रमंत्रेणसकलान्रक्षान्संत्रासयेत्सुधीः॥पश्चा
त्प्रज्वालयेद्वह्निंज्ञानाग्निसंक्रमेणतु॥५७॥दीपाद्दीपांतरंयावत्स्फुरलःसर्वतोमुखं॥श्वासमा
र्गेणमनुवित्तयोनिमार्गेणसंक्षिपेत्॥५८॥कुंडत्रिकोणमध्येतुनेत्रप्रज्वालयेच्छुचिं॥आदौव्याह्न
तिभिःपश्चाद्वह्निमंत्रेणचक्रमात्॥५९॥चितिंगलहनद्वंद्वंदहद्वंद्वंपचद्वयं॥सर्वज्ञांज्ञापय
स्वाहामनुनाभ्यर्चयेत्ततः॥६०॥अग्निंप्रज्वलितंवंदेजातवेदंहुताशनं॥सुवर्णवर्णमनलंसप्तजि
ह्वंविश्वतोमुखं॥६१॥उपस्थानंविधायेत्थंजिह्वांगानिप्रविन्यसेत्॥रक्तसावलरायश्चतत्र
व्यस्वरयान्विताः॥६२॥बिंदुनादांकितासप्तजिह्वर्णाःपरिकीर्तिताः॥पद्मरागासुवर्णाच्च
तृतीयातवलोहिताः॥६३॥लोहिताचतथाश्वेताधूम्रिकाचकरालिका॥क्रमेणयोजयेद्धी २३

जाविन्यसेत्परमेश्वरि॥६४॥सप्तजिह्वंगुदमूर्ध्वास्यानासानेत्रेषुचक्रमात्॥सुराश्चपितरश्चैते
गंधर्वायक्षपन्नगाः॥६५॥क्रियावाराहसाश्चैतस्मर्तव्यास्तासुसप्तसु॥सहस्रार्चिःस्वस्तिपूर्ण
उत्तिष्ठपुरुषस्तथा॥६६॥धूम्रव्यापीसप्तजिह्वाधनुर्धरइतीरिताः॥उं॰तदंतेःषडंगानितत्तोमूर्त्ति
षटकंलिखेत्तु॥६७॥जातवेदाःसप्तजिह्वहव्यवाहनएवच॥विश्वोदरश्चलुर्धस्यावैश्वानरइमे
ततः॥६८॥षष्ठःकौमारतेजाश्चविश्वेदेवमुखोन्यसेत्॥मूर्धासपार्श्वकघंधुकटिपार्श्वांसकेषु
च॥६९॥उं॰ताश्चसकलाज्ञेयाअग्निमूर्त्यंगकाःप्रिये॥एवंविन्यस्तदेहस्तूपर्युक्ष्यार्घ्यजलेनच॥७०॥
दिक्षुदर्भैःपरिस्तीर्यततस्तूपरिषेचयेत्॥वैश्वानरस्ततोजातवेदापश्चाद्धुताशनः॥७१॥लोहिता
क्षेचसंवर्तिकर्माण्यथयसाधयः॥स्वाहांतोणुरयंतारवकोचितिंगलेतिच॥७२॥अनेनवह्निमभ्य
र्च्यततोजिह्वाःसमर्चयेत्॥मध्येचकोणषट्केचततोंगानिप्रपूजयेत्॥७३॥मूर्तयोवसुपत्रेषुभू
बिंबेचदिगीश्वराः॥पुनर्वैश्वानरंयद्वत्त्रिनेत्रंसूर्यप्रभं॥७४॥शुक्लांबरधरंरत्नभूषणंपद्मसंस्थितं॥

वरंत्रासक्लिंस्यस्तिकंचभीतिहारीचबिभ्रतं॥७५॥अनेकहेममालाभिःरंकितंसंस्मरेत्ततः॥अर्घ्यो
दकेनपात्राणिप्रोक्षयेद्धुद्धूयेत्ततः॥७६॥उन्मुखीकृत्यसर्वाणितत्रतत्रविनिक्षिपेत्॥प्रणीताप्रो
क्षणीमुग्मेजलस्त्रुत्यांघृतंतथा॥७७॥अन्यत्सर्वेषुपात्रेषुहोमद्रव्याणिसंक्षिपेत्॥स्रुक्पात्रेच
स्रुचेपात्रेघृतपुष्पंविनिक्षिपेत्॥७८॥स्त्रुवालींदूर्वास्तितांकुर्यात्सर्वतोधूमयेत्प्रिये॥मेखलासंच
सर्वासंवेष्टयेद्दीपमालिकां॥७९॥त्रिपंक्तान्वाभितःकुंडेततोव्याहृतिभिर्हुनेत्॥ब्राह्मणंदक्षिणेभ्य
र्च्यहुनेद्वैष्णवानराणुना॥८०॥गर्भाधानादिसंस्कारांश्चिंतयेत्सर्वसिद्धये॥महागणपतेर्मंत्रान्हुनेत्पू
र्वदत्तआहुतीः॥एतत्क्रमेणदेवेशिसर्वदेवमुखंस्मृतं॥अनेनविधिनाभ्यर्च्यश्रीचक्रंतत्रचिंतयेत्॥८१॥
तदंतरेसमावाह्यमहात्रिपुरसुंदरी॥समस्तचक्रचक्रेशिसहितांहोमयेत्ततः॥दत्त्वाज्याहुतिभिः
पश्चात्पूजनादिक्रमेणच॥समस्तचक्रचक्रेशीप्रकटाद्याश्चयोगिनीः॥८२॥होमयेच्चघृतेने
वचैकैकाहुतिंक्रमात्॥ततःपूर्वोक्तकुसुमैहोमयेत्सुभगांपरां॥८३॥हुत्वनंपद्मरागाद्यां

सर्वसिद्धिप्रदंभवेत्॥रौद्रेरक्तासवर्णाचसर्वकामफलप्रदे॥८४॥लोहिताश्वेतयोःशांतिःस्तं
भनंचक्रमादिशेत्॥उच्चाटणंचधूम्रायांकरालिन्यांचमारणं॥८५॥इतितेकथितंदेवीहोमलक्ष
णमुत्तमं॥हुताविघ्नौघशमनीनान्यथावरवर्णिनी॥८६॥दीपस्त्वनंसमाश्रित्यजपहोमोसमारभेत्॥
वसुकोष्ठंलिखेत्पूर्वंमध्यस्थानंप्रकल्पयेत्॥८७॥स्वरवृंदविभागेनपूर्वादिक्रमतोलिखेत्॥का
द्यवर्गोस्तकसप्तेतपूर्वादिक्रमतोलिखेत्॥८८॥लक्षवर्गोष्ठमेयेज्यःकूर्मचक्रमिदंभवेत्॥ज्ञाना
क्षरंयत्रदेविसिद्धिस्तत्रनसंशयः॥८९॥ज्ञानाक्षरंमुखंज्ञेयंपार्श्वयोस्तस्यवैकरौ॥तत्रशून्यंफलं
मध्यकोष्ठयुग्मंतुमस्तकं॥९०॥उदरंकच्छपस्येतत्पादौतत्पुच्छमोक्रमात्॥रोगहानिकरौपुछं
तयोर्मध्यगतंभवेत्॥९१॥दारिद्र्यदुरवदंचैवतस्माद्वक्त्रंसमाश्रयेत्॥तत्रैवसिद्धिर्नान्यत्रश्रीयु
रोराज्ञयाप्रिये॥९२॥देवंवाकल्पयेत्स्त्वानंनगरंग्राममेववा॥दीपोवासोपिकर्तव्यःकिंपुनर्हवनंज
पः॥९३॥ ॥इतिश्रीदक्षिणामूर्तिसंहितायांहोमलक्षणंनामत्रिंशत्पटलः॥३०॥ ॥ईश्वरउ

याच ॥अथातः संप्रवक्ष्यामिचक्रराजस्यसाधनं ॥एवंसंसिद्धविद्यायाविनियो ॥क्रमेश्रृणु ॥१॥
दृत्वासिंदूररजसाचक्रंतत्रविचिंतयेत् ॥साध्यप्रतिकृतिंनामलेखनांकांशुभांततः ॥२॥ त्रैलो
क्यक्षोभणीमुद्रयाविद्यांसम्यगष्टशतंजपेत् ॥योजयेत्तांकामगेहेचंद्रसूर्यकलात्मके ॥३॥ततस्तं
स्त्रिलोकेशीचिंतयेदरुणप्रभं ॥आत्मानंचतथासाध्यंतदासोभाग्यसुंदरः ॥४॥अरुणैरुपचारैस्तं
पूजयेन्मुद्रयान्वितः ॥यस्यनाम्नायुतःसम्यक्सभवेदासएवहि ॥५॥अष्टदलंचीनामवर्णैःचक्र
मध्येविलिखेत्पुनः ॥योनिमुद्राधरोभूत्वावेगादाकर्षणंभवेत् ॥६॥देवकन्यांराजकन्यानागकन्या
मथापिवा ॥गोरोचनाकुंकुमाभ्यांसमभागंचचंदनं ॥७॥अष्टोत्तरशतावृत्यातिलकंसर्वमोहनं ॥पुष्प
फलंतलंवास्त्रंगंधवस्त्रंचभूषणं ॥८॥तांबूलंजपपूर्वंचयस्मैसंप्रेष्यतेस्वतु ॥अंगनावीक्षणादेव
दासीचास्यभवेत्प्रिये ॥९॥करवीरैरक्तवर्णैस्त्रिमध्यंतंश्रयंपूजयेत् ॥चिंतयेन्मासमात्रंहिसाध
यंल्लनांततः ॥१०॥इतिस्वाभेक्षणानिपूजयेदरुणप्रभां ॥सिंदूररचितेचक्रराजेसंमोहये

स्क्षणात् ॥११॥त्रैलोक्यक्षुभंचापिरंभांचाकर्षयेद्बलात् ॥चिंतांगारेणचक्रंतुलिखेद्रक्तद्रवेण
हि ॥१२॥वध्याबाहुवथस्कापिज्वरेनाज्ञायतिक्षणात् ॥अर्कनिंबद्रवाभ्यांतुलेखन्यार्कस्यसंलिखेत् ॥१३॥
द्यूतेनामभध्यबाह्यदेशेचक्रस्यसंलिखेत् ॥गोमूत्रेस्नापयेत्तच्चभवेद्द्यूतेषुक्षणात् ॥१४॥धूपये
च्चंदनंरात्रौवस्त्रंवाधारयेत्ततः ॥अष्टोत्तरजपात्पश्चाद्धोमयेद्भुवनत्रयं ॥१५॥लिप्तगोमयभस्मेतु
लिखेद्रोचनयाततः ॥सरूपांप्रतिमांरम्यांभूषाढ्यांपरिचिंतयेत् ॥१६॥तद्वालगलरत्नाभिज
न्मभंडलयोजितां ॥जन्मनामहाविद्यांकुशांतर्विदर्भितं ॥१७॥सर्वांगसंधिसंलीनंकाम
कूटंसमालिखेत् ॥साध्यावामाभिमुखोभूत्वाश्रीविद्यान्यासविग्रहः ॥१८॥क्षोभिणीमुद्रयावि
द्यांसम्यगष्टशतंजपेत् ॥योजयेत्तांकामगेहेचंद्रसूर्यकलात्मके ॥१९॥सानुरागालुविकलाका
मसायकपीडिता ॥त्रैलोक्यसुंदरीवापिक्षणादायातिमोहिता ॥२०॥अथवामात्मकाचक्रंबा
ह्येसंवेष्यमंत्रवित् ॥तच्चक्रंपूजयेत्सम्यक्विद्यापूर्णंविधारयेत् ॥२१॥अवध्यासर्वभूतानां

व्याघ्रादीनांनसंन्यायः॥श्रीखंडागरुकस्तूरीकर्पूरैश्चसकुंकुमैः॥२२॥स्वनामक्रमतोलेख्य
पूर्ववन्मात्रकांलिखेत्॥तेनाजरामरत्वंचसाधकस्यनसंन्यायः॥२३॥अनेनैवप्रकारेणरो
चनागरकुंकुमैः॥चक्रंविलिख्यसाध्यार्णंसाधकंतंविदर्भितं॥२५॥त्रैलोक्यमोहनोमंत्रीभ
वत्येवनसंन्यायः॥कामकूटेनदेवेशिसंदर्भंषष्ठथगक्षरं॥२६॥साध्यनामत्रिकोणांतर्मात्रकां
वेष्टयेद्बुधः॥स्वर्णमध्यगतंधार्यंशिरवायांयत्रकुत्रचित्॥२७॥लोकपालश्चराजानोदुष्ट
स्त्रैलोक्यसंस्थिताः॥तेसर्वेवशमायांतिसन्निपातादयोऽवराः॥२८॥अनेनविधिनानामपुरा
संदर्भसंलिखेत्॥चतुष्पथेमध्यदेशेदिक्षुपूर्वादिषुक्रमात्॥२९॥तस्यसौभाग्यमायातिराजा
नःकिंकराःसदा॥स्फुरत्तेजोमयींपृथ्वींप्रज्वलंतींचराचरं॥३०॥चक्रांतःश्रियंतयेन्नित्यंमासष
ट्कंततोनरः॥तेनकंदर्पसुभगोलोकेभवतिनिश्चयात्॥३३॥दृष्ट्वाचाकर्षतेलोकंविषन्नारा
यतिज्वरान्॥तथाविषंचहरतिदृष्टावश्यंकरोतिच॥३२॥रात्रौसिंदूरलिखितंपूजयेदक्षि

ततः॥यदातदेवलोकोयंवश्योभवतिनान्यथा॥३३॥करोत्याकर्षणेदूराद्योजनानांत्रयादपि॥
अरक्तउदिक्षुकोणेषुक्रमेणपरिपूजयेत्॥३४॥यदातदेवलोकोयंवश्योभवतिनान्यथा॥भूर्जप
त्रेलिखेच्चक्रंरोचनागरकुंकुमैः॥३५॥स्वनामदर्भितंकुर्याद्वेष्टांवापुटभेदनं॥मंडलंविषम
स्थानंभस्मोचक्रंनिधापयेत्॥३६॥धारयेद्यततोमंत्रीपुरंक्षोभयतिक्षणात्॥उन्मत्तरसला
क्षार्कक्षीरंकुंकुमरोचनाः॥३७॥कस्तूर्यलकसहिताएकीकृत्यतुसंलिखेत्॥यन्नाम्नातस्य
देवेशिचोरजंव्याघ्रजंभयं॥३८॥ग्रहजंव्याधिजंचैवरिपुजंसिंहजंभयं॥अहिजंबालिजंनास्ति
सर्वान्मोहयतिक्षणात्॥३९॥रोचनाकुंकुमाभ्यांतुमध्यगंसंलिखेद्बुधः॥त्रिकोणेभयगंचैव
साध्यनामांकितंधमः॥४०॥तच्चक्रंधारयेत्तस्मात्सप्ताहात्किंकरोभवेत्॥पीतद्रव्येणचक्रांत
लिखेद्विद्वानधस्ततः॥४१॥साध्यनामविलिख्येतत्पूर्वस्यादिशिसंक्षिपेत्॥तस्माद्धूलापि
जीवोपिसर्वज्ञोमस्कतांव्रजेत्॥४२॥अनेनविधिनानीलीरसेनविलिखेच्यतत्॥दक्षिणाभि

मुरयोमंत्रीवह्निंदग्धारिपुंदहेत्॥४४॥महीषाश्वपुरीषेणगोमुत्रेणचसंलिखेत्॥आरनाल
स्त्रितंकुर्याद्विहेषणंक्षणात्॥४५॥साध्यनामलिखेन्मध्येकाकपक्षेणवेष्टयेत्॥संलिख्य
रोचनाघ्राणेराकान्तोदृष्टिगंतथा॥४६॥रात्र्युच्चाटयेद्वश्यहनोच्चाटोयमीरितः॥महामिली
रसोद्भिन्नरोचनादुग्धमिश्रितो॥४७॥लाक्षारसैर्लिखेच्चक्रंचतुर्वर्णान्वर्णानयेत्॥अनेनवि
धिनानीरस्थापयेज्जलेनतु॥४८॥सौभाग्यमहदाप्नोतिस्नानपानान्नसंग्रायः॥पीतंचक्रं
पजेत्पूर्वस्तंभयेत्सर्ववादिनः॥४९॥सिंदूरलिखितंचक्रमुत्तरेलोकवश्यकृत्॥पश्चिमेपूजनं
चक्रंगोरिकालिखितंततः॥५०॥मंत्रिणोदेवतावश्याःकिंपुनर्योषितःप्रिये॥तथैवदक्षिणास्य
स्कंदूष्णंचक्रंसमर्चयेत्॥५१॥साध्यस्यमंत्रहानिःस्यान्मरणंचविशोषतः॥क्रमादिगंतरा
स्यस्कंदवह्निकोणादिषुक्रमात्॥५२॥स्तंभद्विहेषणंव्याधिमुच्चाटंकुरुतेनरः॥दुग्धवश्य
करंशिरोरोचनालिखितंहरेत्॥५३॥दुग्धातंदूर्व्हिमध्यस्तंसर्वशत्रून्विनाशयेत्॥गो २७

मुत्रमध्यगंचैवभवेदुच्चाटणंरिपोः॥५४॥विहेषणंभवेच्चक्रंतेनैवपरमेश्वरि॥सिंदूरेण
लिखेच्चक्रंतर्जनंचचलुप्यथे॥५५॥सर्ववश्यान्तमारभ्यमध्यंतंमात्कालिखेत्॥कुला
चारक्रमेणैवरात्रौसंपूजयेत्क्रमात्॥५६॥साधकःस्वेचरोदेवीजायतेनात्रसंशयः॥चतु
र्दश्यांनिशिस्वस्थोलक्ष्मीमंत्रंजपेत्॥५७॥षण्मासंसंख्ययातेनसाक्षाद्रुद्रइवापरः॥
अंजनंविवरंसिंहघृतिकोपादुकांजयं॥५८॥खड्गवेतालसौभाग्यंयक्षिणीचेटकादिकं॥
सकलंसिद्धिजननंमंत्रीप्राप्नोतिनान्यथा॥५९॥चतुर्दश्याचतुर्दश्यांप्रत्यूषेसंसमाहितः॥
एकविंशतिरात्रंचनिशिप्रेतक्षमातले॥६०॥श्रीचक्रपूजनात्तद्वत्सरपूजपरसाधकैः॥
पात्रांकुशधनुर्बाणैःपोरुषेयैर्महेश्वरि॥६१॥कामोभूत्वास्वर्गभूमियातालतलयोस्त्रि
यां॥हर्त्ताकर्त्तास्वयंचैवतन्महाकर्षणंभवेत्॥६२॥तद्वत्कामेश्वरीद्वारैरिष्यात्मभुवनत्र
ये॥पुरुषाकरणंचैतत्प्रज्ञानःकिंकराःप्रिये॥६३॥एतत्कामकलाध्यानंकथितंबीजभेदतः॥

वाग्भवाराधनाद्देविज्ञानंसारस्वतंभवेत्॥६४॥अथकामकलाकामसामघ्र्यंशृणुपार्व
ति॥कामंमन्मथंकंदर्पमकरध्वजएवच॥महाकामश्चपूर्वोक्तापंचकामाक्रमेणतु॥६५॥
कामेमन्मथमध्यस्थदेवीकंदर्पवेत्रगं॥तत्पुटस्थमीनकेतंमहाकामेत्रामस्तकं॥६६॥अने
नकामतत्वेनमोहयेज्जगतीमिमां॥श्वेताभरणवस्त्राढ्योश्वेतपुष्पैःसमर्चयेत्॥६७॥अ
नेनविधिनादेविवाग्भवाराधनंभवेत्॥सृष्टिसंहारविस्तंतुसनीयसीं॥६८॥त
स्मात्कुंडलीनीशक्तिःशक्तिकूटमहेश्वरि॥त्रिकूटात्रिपुरादेविसर्वसिद्धिप्रदाभवेत्॥६९॥
चतुःषष्टिर्यतःकोट्योयोगिनीनामहौजसां॥चक्रमेतत्समाश्रित्यसदासिद्धिप्रदाःस
दा॥७१॥ ॥इतिश्रीदक्षिणामूर्त्तिसंहितायांश्रीविद्याप्रयोगबीजसाधनंनामएक
त्रिंशत्पटलः॥३१॥ ॥ईश्वरउवाच॥अथदीक्षाविधिंवक्ष्येदुर्लभंभुवनत्रये॥पूर्वोक्तेन
प्रकारेणनवयोन्यकितंततः॥१॥बुध्यासंयोजयेन्मंत्रीयथान्यस्त्रंप्रजायते॥वसुकोणंहृद्

यारंषोडशारंततःपरं॥२॥द्विर्द्वादशारंचसयुक्तंततोष्टदलमालिखेत्॥भूबिंबंचततोदेवीपूजये
त्त्रिपुरांपरां॥३॥अतदावंगानिसंपूज्यत्रिकोणेषुरतित्रयं॥मातरोपरपत्रेषुवामाद्यारविषोनिषु॥४॥
नित्यानित्यानिरंजनाक्लिन्नाक्लेदिनीमदनातुरा॥मदद्रवाद्राविणीचद्रविणारागवत्यपि॥५॥कामेश्वरी
तथाकामदायिनीकामकेश्वरी॥ललिताक्षोभिणीभद्रास्वच्छंदाललिताक्रमात्॥६॥कलोयोनिषु
संपूज्यातत्तोविंशतियोनिषु॥मायावतीमहालक्ष्मीततःसर्ववशंकरी॥७॥संकारीभीमरावाच्च
मलाकमलेश्वरी॥मलिनीवाविशालाक्षीभेरुंडाडामरेश्वरी॥८॥समयासमयेत्रागनिनित्यानंदा
महोदया॥सर्वसौभाग्यदानंदाचंडिकाचंद्रशेखरा॥९॥सर्वेश्वरीचसंपूज्यापीठानिवसुपत्रके॥
भूगृहेत्रिपुरेशीचदीक्षायोन्यंकितंयजेत्॥१०॥एतदग्रेषुधान्येस्कसाधारंकलशंक्षिपेत्॥विशे
षगंधपुष्पैस्कस्वर्णरत्नैःप्रपूजयेत्॥११॥समीपेचक्रराजानंसम्यगभ्यर्च्यदेशिकः॥आद्य
क्षरेणसंलग्नंसंदंशनामकल्पयेत्॥१२॥आत्मानंयोजयित्वागुरुभिर्मानवैस्ततः॥स्मर्तव्या

उरवः सर्वेसम्यक्प्रणतिपूर्वकं॥१३॥भ्रूमौलिरिवत्वाविद्यांचसम्यक्पुष्पादिभिर्यजेत्॥
शिष्यांयदन्यपेद्विद्यांजपनान्नाभयात्प्रिये॥१४॥यस्मिन्महतीप्रीतिःशिष्यस्यप्रणतस्य
तु॥एकोच्चारणमात्रेणदक्षकर्णजपेत्परां॥१५॥षोडशार्णांपरांविद्यांनदद्यात्कस्यचित्प्रिये॥
राज्ञेराज्यप्रदायापिपुत्रायप्रणदायवा॥१६॥शांभवाद्यांप्रकुर्वीतदृष्ट्वारेचरसंज्ञिकां॥अनि
र्वाच्योपदेत्तस्यतत्रानाङ्कुलणोभवेत्॥१७॥कलशस्थैःपल्लवैस्तत्रिवारंप्रोक्षयेत्सुतं॥
भवेत्पदाभिषेकस्तुतदासोदेत्रीकाग्रणीः॥१८॥गंडूषमुरवसंयुक्तस्तदाहोर्यन्निवार्चने॥
अन्यथानैवसिद्धिस्यात्सविकल्पस्तुपार्वती॥१९॥गंडूषदानेशिष्यस्यविकल्पोयदिजायते॥
नसिद्धिस्तस्यकुत्रापिश्रीविद्याचपराङ्मुखी॥२०॥उरचेदीयतेसर्वमज्ञानंक्षाल्यतेपिच॥
तस्माद्दीक्षेयमाख्यातामंत्रसिद्धिकरीप्रिये॥२१॥दीक्षितस्येन्महेशानिकृतीयागंसमाचरेत्॥
विशेषार्घ्यविधिंकुर्यात्पश्चादूतिंसमाचरेत्॥२२॥समयाचारविधिनामंडितांसुंदराननां॥

२९

अरक्षेत्रकुलाद्भूतांतरुणीचारुलोचनां॥२३॥आनंदमुदितांग्रात्यांविरूपांविद्रुताननां॥
श्यंगांचंद्रांचविधवांविरक्तांभक्तिवर्जितां॥२४॥कुमारींकुष्ठितांरिक्तांदूषिणीव्रतचारिणीं॥
वर्जयेत्परमेशानिपूर्वोक्ताचेत्सलोचना॥२५॥भगमालांसमुच्यार्यतस्यायोनिंप्रपूजयेत्॥
श्रीविद्यांपूजयेत्तत्रनवचक्रक्रमोदितां॥२६॥तद्योनौपूजयेद्देविश्रीविद्यांषोडशाक्षरीं॥काम
श्वरीस्वरूपांचकामराजैर्विराजितां॥२७॥कामेश्वरंप्रवक्ष्यामितत्रभेदनसुंदरी॥वेदादि
पीठसंराजत्परांपीठनिवासिनीं॥२८॥त्रिकूटांत्रिकलांदेविशिवायत्वंयजेन्मनुं॥स्वाधि
ष्ठानेदशार्णेननवचक्रेश्वरेणहि॥२९॥पूजयेत्कामरूपःसन्कामराजैश्चितेःप्रियैः॥सीत्का
रःप्रणवोदेविभाषणंजपउच्यते॥३०॥तत्वानंदस्तुबंधनंस्यात्कुचमर्दःशिवार्चनं॥नखदंतक्षता
दीनिपुष्पमालादिपूजनं॥३१॥ताडनंवहनंविद्धिवीर्यस्खद्धिर्विवर्जनं॥वीर्यरक्तःसमादायविशे

षार्घ्यंनिधापयेत्॥३२॥तेनाम्रतेनश्रीदेवींतर्पयेल्कुलमार्गतः॥अतिप्रमथनाद्देवीसस्र
त्रेस्त्रीरजस्तदा॥३३॥नरवास्थिरत्नोमुख्यानिकुलद्रव्याणिभाग्यतः॥भैरवोयहिसंजातः
सिद्धिस्तस्यनसंशयः॥३४॥निर्विकल्पस्कमेत्रज्ञोब्रह्मसाक्षान्नसंशयः॥काम्पंनमित्तिक
ज्ञात्वाश्रीविद्यांपुरतोयजेत्॥३५॥दीक्षितस्याधिकारोत्रनान्यस्यपरमेश्वरि॥पुस्तकेलि
खितंदृष्ट्वास्वयंज्ञात्वाकरोतियः॥३६॥ब्रह्महत्यासुरापानंस्वर्णस्तेयादिपातकैः॥लि
प्यतेनात्रसंदेहोनरकेनिवसत्यसौ॥३७॥ ॥इतिश्रीदक्षिणामूर्तिसंहितायांदी
क्षादृत्तीविवरणंनामैत्रिंशत्पटलः॥३२॥ ॥श्रीगजाननार्पणमस्तु॥ ॥ओरथ्व
रेनलिखितंभरयात्॥ ॥ग्रंथसंख्या६००

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

॥इतिश्रीदक्षिणामूर्तिसंहितासमाप्तः॥